M-2691

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
अ. रामायण सुंदर कांड	हरिराम वर्मा	पुराण	पूर्ण	-	5/12	26	संस्कृत	कागद	13	37		

सुंदरकांडप्रारंभः अध्या०

रा॰सु॰ श्री॰ १

श्रीगणेशाय नमः॥ शतेति॥ लिलंघयिषुः स्वार्थे णिच् आनंदसंदोहः॥ तत्समूहरूपः तत्समूहवान्वा॥ १॥ २॥
रामनिर्मुक्तं रामत्यक्तं॥ पश्यामीति॥ भाविन्यपि वर्त्तमानत्वारोपो वश्यभावित्वद्योतनाय॥ ३॥ कृतार्थः जगन्मा
तृदर्शनेनेति भावः ममसमुद्रलंघनमकिंचित्करमित्याह प्राणेति॥ ४॥ अपारमित्युभयान्वयि विविध परि

महादेवउवाच॥
श्री॰॥ शतयोजनविस्तीर्णं समुद्रं मकरालयं॥ लिलंघयिषुरानंदसंदोहो मारुतात्मजः॥ १॥
ध्यात्वा रामं परात्मानमिदं वचनमब्रवीत्॥ पश्यंतु वानराः सर्वे गच्छंतं मां विहायसा॥ २॥
अमोघं रामनिर्मुक्तं महाबाणमिवाखिलाः॥ पश्याम्यद्यैव रामस्य पत्नीं जनकनंदिनीं॥ ३॥ कृता
र्थोहं कृतार्थोहं पुनः पश्यामि राघवं॥ प्राणप्रयाणसमये यस्य नाम सकृत्स्मरन्॥ ४॥ नरस्तीर्त्वा
भवांभोधिमपारं याति तत्परं॥ किं पुनस्तस्य दूतोहं तदंगांगुलिमुद्रिकः॥ ५॥ तमेव हृदये ध्या
त्वा लंघयाम्यल्पवारिधिं॥ इत्युक्त्वा हनुमान्बाहू प्रसार्यायतवालधिः॥ ६॥ ऋजुग्रीवोर्ध्व
दृष्टिः सन्नाकुंचितपदद्वयः॥ दक्षिणाभिमुखस्तूर्णं पुप्लुवेऽनिलविक्रमः॥ ७॥ आकाशात्वरि
तं देवैर्वीक्ष्यमाणो जगाम सः॥ दृष्ट्वानिलसुतं देवा गच्छंतं वायुवेगतः॥ ८॥

॥ छेरभ्यस्तं तस्य दंतत्वरूपं
तदंगभूताया अंगुलिस्तन्मुद्रिका सा भूताया समुद्रिका सा अस्यास्तत्स्पर्श आद्यचू॥ ५॥ अल्पवारिधिमित्यपा
रं भवांभोधेर्व्यतिरेकालंकारः तं लंघयामीति किं वक्तव्यमित्यन्वयः वाहूइत्यादि वानरो त्प्लवनजातिवर्णनं

राम॰ १

वानरस्य सत्वस्य वानरीयबलस्य परीक्षणार्थमिदमब्रुवन् विचारयामासुरित्यर्थः तद्दृश्यति एवं विचार्येति धातूनामनेकार्थत्वात् ब्रूञोपि विचारे वृत्तिः ॥९॥ लंकाप्रवेशे शक्तो वा यनेति संदेहस्तस्मादस्य बलं जानी

परीक्षणार्थं सत्वस्य वानरस्येदमब्रुवन् ॥ गच्छत्येष महासत्वो वानरो वायुविक्रमः ॥९॥ लंकां प्रवेष्टुं शक्तो वानवा ज्ञानीमहे बलं ॥ एवं विचार्य नागानां मातरं सुरसाभिधां ॥१०॥ अब्रवीद्देवतावृंदः कौतूहलसमन्वितः ॥ गच्छं तं वानरेंद्रस्य किंचिद्विघ्नं समाचर ॥११॥ ज्ञात्वा तस्य बलं बुद्धिं पुनरेहि त्वरान्विता ॥ इत्युक्ता सा ययौ शीघ्रं हनुमद्विघ्नकारणात् ॥१२॥ आवृत्य मार्गं पुरतः स्थित्वा वानरमब्रवीत् ॥ एहि मे वदनं शीघ्रं प्रविशस्व महामते ॥१३॥ देवैस्त्वं कल्पितो भक्ष्यः क्षुधासंपीडितात्मनः ॥ तामाह हनुमान्मातरहं रामस्य शासनात् ॥१४॥ गच्छामि जानकीं द्रष्टुं न रागम्य स त्वरः ॥ रामाय कुशलं तस्याः कथयित्वा त्वदाननं ॥१५॥ निवेक्ष्ये देहि मे मार्गं सुरसायै नमोस्तु ते ॥ इत्युक्ता पुनरेवाह सुरसा क्षुधितास्म्यहं ॥१६॥ प्रविश्य गच्छ मे वक्त्रं नो चेत्त्वां भक्षयाम्यहं ॥ इत्युक्तो हनुमानाह मुखं शीघ्रं विदारय ॥१७॥ प्रविश्य वदनं ते द्य गच्छामि त्वरयान्वितः ॥ इत्युक्त्वा योजनायामदेहो भूत्वा पुरः स्थितः ॥१८॥

९ महे हेनि शेष्यामइत्यर्थः ॥१०॥ देवतावृंदः देवतासमूहः ॥११॥१२॥१३॥
क्षुधया संपीडित आत्मा यस्यास्तस्या इत्यर्थः ॥१४॥१५॥ निवेक्ष्ये प्रवेक्ष्यामि ॥१६॥ मे वक्त्रं प्रविश्य तत्ते निःसृत्य गच्छ

१९ त्रिंसद्योजनसंमितंवपुश्चकारेतिशेषः २० २१ २२ २३ पुनर्गत्वाकिष्किंधामितिशेषः २४ मणिकांचन
पर्वतंमैनाकादियुतं शृंगयुतपर्वतं २६ सचिवोभवमध्येविश्रमदानेनसहायोभवित्यर्थः तत्साहनिमि

दृष्ट्वाहनूमतोरूपंसुरसापंचयोजनं मुखंचकारहनुमान्द्विगुणंरूपमादधत् १९ ततश्चका
रसुरसायोजनानांचविंशति वक्त्रंचकारहनुमान्त्रिंशद्योजनसंमितं २० [illegible]
चाशद्योज[illegible] हनूमान् [illegible]
ततश्चकारसुरसापंचाशद्योज
नायतं वक्त्रंतदाह नूमांस्तुबभूवांगुष्ठसन्निभः २१ प्रविश्यवदनंतस्याःपुनरस्यपुरःस्थितः प्र
विष्टोनिर्गतोहंतेवदनंदेवितेनमः २२ एवंवदंतंदृष्ट्वासाहनूमंतमथाब्रवीत् गच्छसाधयराम
स्यकार्यंबुद्धिमतांवर २३ देवैःसंप्रेषिताहंतेबलंजिज्ञासुभिःकपे दृष्ट्वासीतांपुनर्गत्वारामंद्रक्ष्य
सिगच्छभो २४ इत्युक्त्वासाययौदेवलोकंवायुसुतःपुनः जगामवायुमार्गेणगरुत्मानिवपक्षि
राट् २५ समुद्रोप्याहमैनाकंमणिकांचनपर्वत गच्छत्येषमहासत्वोहनूमान्मारुतात्मजः
२६ रामस्यकार्यसिध्यर्थंतस्यत्वंसचिवोभव सगरैर्वर्द्धितोयस्मात्पुराहंसागरोभवं २७
तस्यान्वयेबभूवासौरामोदाशरथिःप्रभुः तस्यकार्यार्थं [illegible] सिध्यर्थंगच्छत्येषमहाकपिः २८

त्वंमत्प्रेरणेकोहेतुस्तत्राह सगरैरितिपुरापूर्वंसगरैर्वर्धितइतिहेतोरहंसागरस्तन्नामाभवं २७ तस्यवंशेच

रामस्यकार्यसिद्ध्यर्थंगच्छत्येष २८

अतस्त्वमुत्तिष्ठेत्यन्वयः ॥२९॥ नानामणिमयैः शृंगैर्महोन्नत इत्यर्थः ॥ तस्योपरि नरकृतिर्मनुष्याकारेण स्थितो
मैनाकः प्राह ॥३०॥ विश्रामायेत्यार्षं ॥३१॥३२॥ कथं भवेदित्यादेरनुचितं तदित्यर्थः तत्र हेतुर्गतव्यं त्वरितं म
ये ॥३३॥ कराग्रेण स्पृष्टशिखरो ययावित्यन्वयः छायास्पर्शमात्रेण जंतूनां गतिनिरोधेनाकर्षक छायास

त्वमुत्तिष्ठ जलात्तूर्णं त्वयि विश्राम्य गच्छतु ॥ सतथेति मातुरभूज्जलमध्यान्महोन्नतः ॥२९॥ ना
नामणिमयैः शृंगैस्तस्योपरि नराकृतिः ॥ प्राह यांतं हनूमंतं मैनाकोहं महाकपे ॥३०॥ समुद्रेण
समादिष्टस्त्वद्विश्रामाय मारुते ॥ आगच्छामृतकल्पानि जग्ध्वा पक्वफलानि मे ॥३१॥ विश्राम्याच
क्षणं पश्चाद्गमिष्यसि यथासुखं ॥ एवमुक्तो थ तं प्राह हनूमान्मारुतात्मजः ॥३२॥ गच्छतो राम
कार्यार्थंम क्षणं मे कथं भवेत् ॥ विश्रामो वा कथं मे स्यादुक्तं तत्त्वरितं मया ॥३३॥ इत्युक्त्वा स्पृष्ट
शिखरः कराग्रेण ययौ कपिः ॥ किंचिद्दूरं गतस्यास्य छायां छायाग्रहोग्रहीत् ॥३४॥ सिंहिका
नाम सा घोरा जलमध्ये स्थिता सदा ॥ आकाशगामिनां छायामाक्रम्याकृष्य भक्षयेत् ॥३५॥ तया
मेरु गृहीतो हनुमान् चिंतयामास वीर्यवान् ॥ केनेदं मे कृतं वेग रोधनं विघ्नकारिणा ॥३६॥ दृश्यते नै मा रु
व कोप्यत्र विस्मयो मे प्रजायते ॥ एवं विचिंत्य हनुमा नधो दृष्टिं प्रसारयत् ॥३७॥

॥ हइस्युच्यते ॥३५

तदेवाह सिंहिकेति भक्षयेत् भक्षयतीत्यर्थे आर्षं ॥३५॥३६॥ विस्मय आश्चर्यं पत्कस्याप्यदर्शने वेगरोध
श्चेत्याश्चर्यं प्रसारयत् प्रसारयत् अड भावश्चार्षः ॥३७॥ रामो जयति ॥ रामो जयति राम॥॥

रा॰ अ॰ सुं॰ सिंहिकां तन्नामां राक्षसीं ३८ दक्षिणं कूलं सागरस्येति शेषः ३९ ४० बहुभिः प्राकारैः अंतर्दुर्गमध्यदुर्गबहि
३ र्दुर्गसंबंधिभिः परिखाः प्राकारबहिर्गर्त्ताः ४१ वेक्ष्यामि प्रवेक्ष्यामि सूक्ष्मः सूक्ष्मशरीरो भूत्वेत्यर्थः लंकां जगाम

तत्र दृष्ट्वा महाकायां सिंहिकां घोररूपिणीं पपात सलिले तूर्णं पद्भ्यामेवाहनद्रुषा ३८ पुनरुत्प्लु
त्य हनुमान् दक्षिणाभिमुखो ययौ ततो दक्षिणमासाद्य कूलं नानाफलद्रुमं ३९ नानापक्षिमृ
गाकीर्णं नानापुष्पलतावृतं ततो ददर्श नगरं त्रिकूटाचलमूर्द्धनि ४० प्राकारैर्बहुभिर्युक्तं परि
४ तैः खाभिश्च सर्वशः प्रवेक्ष्यामि कथं लंकामिति चिंतापरोऽभवत् ४१ रात्रौ वेक्ष्यामि सूक्ष्मोऽहं लंकां
रावणपालितां एवं विचिंत्य तत्रैव स्थित्वा लंकां जगाम सः ४२ धृत्वा सूक्ष्मं वपुर्द्वारं प्रविवेश प्र
तापवान् तत्र लंकापुरी साक्षाद्राक्षसीवेषधारिणी ४३ प्रविशंतं हनूमंतं दृष्ट्वा लंकाभ्यतर्ज
यत् कस्त्वं वानररूपेण मामनादृत्य लंकिनीं ४४ प्रविश्य चोरवद्रात्रौ किं भवान् कर्त्तुमिच्छति
इत्युक्त्वा रोषताम्राक्षी पादेनाभिजघान तं ४५ हनुमानपि तां वाममुष्टिना वज्ञयाहनत् तदैव
पतिता भूमौ रक्तमुद्वमती भृशं ४६ उत्थाय प्राह सा लंका हनूमंतं महाबलं हनुमन्नुगच्छ भद्रं ते रा॰
जिता लंका त्वयानघ ४७ ३

॥रात्राविति शेषः ४२ सूक्ष्मं बपुर्धृत्वा द्वारं प्रविवेश ४३ ४४ रात्रौ चो
रवत् प्रविश्य गच्छसीति शेषः स त्वं क इत्येकः किं भवानित्यादि प्रश्नांतरं ४५ ४६ ४७ राम राम

अष्टाविंशति पर्यये इति यद्यपि अन्यन्य चतुर्विंशतिमे पर्याये त्रेतायां रामावतारो ष्टविंशति पर्याये द्वापरांते कृष्णा
वतार इत्युक्तं तथापि कल्पांतर परतया विरोध परिहारिहारो व सेयः ४८ योगमाया च सीतेति जनिष्यत
इत्यन्वयः क्वचित् अवतार पूर्वकाले प्रार्थितो जनिष्यत इत्यन्वयः ४९ ५० साचिव्यं सख्ये ५१ ५२ ५३

पुराहं ब्रह्मणा प्रोक्तो ह्यष्टाविंशतिपर्यये त्रेतायुगे दाशरथी रामो नारायणोऽव्ययः ४८ ज
निष्यते योगमाया सीता जनकवेश्मनि भूभारहरणार्थाय प्रार्थितोयं मया क्वचित् ४९ स
भार्यो राघवो भ्रात्रा गमिष्यति महावनं तत्र सीतां महामायां रावणोऽपहरिष्यति ५० पश्चाद्रामे
ण साचिव्यं सुग्रीवस्य भविष्यति सुग्रीवो जानकीं द्रष्टुं वानरान् प्रेषयिष्यति ५१ तत्रैको वानरो
रात्रावागमिष्यति तेंतिकं त्वया च भर्त्सितः सोपि त्वां हनिष्यति मुष्टिना ५२ तेनाहता त्वं व्यथि
ता भविष्यसि यथानघे तदैव रावणस्यांतो भविष्यति न संशयः ५३ तस्मात्त्वया जिता लं
का जितं सर्वं त्वयानघ रावणांतःपुरवरे क्रीडाकाननमुत्तमं ५४ तन्मध्ये शोकवनिका दिव्य
पादपसंकुला अस्ति तस्यां महावृक्षः शिंशपानाम मध्यगः ५५ तत्रास्ते जानकी घोरराक्षसी
भिः सुरक्षिता दृष्ट्वैव गच्छ त्वरितं राघवाय निवेदय ५६

यतस्त्वयाहं लंका जिता तस्मात्त्वया सर्वं राक्ष
सकुलं जितं अथ सीता स्थितिस्थानमाह रावणांतःपुरेति ५४ ५५ ५६ ॥०॥०॥०॥ ०॥०॥

रा॰अ॰सुं॰ यतो मे राघवस्मृती रासीदतो हमपि धन्या हृद्भक्तसंगम्यापि दुर्लभत्वं किंवक्तव्यमितिभावः प्रसीदतांप्रसन्नः
४ स्थासतां ५७ पुस्फोर स्फुरितमभवत् सुजो वाम एव स्त्रिया वामांगस्फुरणं शुभसूचकं पुंसो शुभमिति
भावः अतीद्रियस्य इंद्रियाविषयस्य रामस्य दक्षांगं पुस्फोट यद्वा रामसंबोधि अतींद्रियंगुरुत्वे यदिंद्रित

धन्याहमप्यद्य चिराय राघव स्मृतिर्ममासीद्भवपाशमोचनी तद्भक्तसंगोप्यतिदुर्लभो
मम प्रसीदतां दाशरथिः सदा हृदि ५७ उक्त्वेधिते श्री पवनात्मजेन धरासुतायाश्च दशा
ननस्य पुस्फोर वामाक्षिभुजश्च तीव्रं रामस्य दक्षांगमतींद्रियस्य ५८ इतिश्रीमध्यात्म ८३
रामायणे उमामहेश्वरसंवादे सुंदरकांडे प्रथमः सर्गः १ ततो जगाम हनुमान्लंकां परमशोभ
नां रात्रौ सूक्ष्मतनुर्भूत्वा बभ्राम परितः पुरीं १ सीतान्वेषणकार्यार्थी प्रविवेशान्नपालयं त
२ सर्ग त्रैप्रदेशेषु विविच्य हनुमान् कपिः २ नापश्यज्जानकीं स्मृत्वा ततो लंकाभिभाषितं जगा
म हनुमान् शीघ्रमशोकवनिकां शुभां ३ सुरपादपसंबाधां रत्नसोपानवापिकां नानाप
क्षिमृगाकीर्णां स्वर्णप्रासादशोभितां ४

॥स्य दक्षांगं दक्षिणभागं पुस्फोट तत्स्फुरणं च स्त्रीलाभसू
चिकं पुंसामित्याहुः ५८ इतिश्री मध्यात्मरामायणे सुंदरकांडे प्रथमः सर्गः १ तत इति सूक्ष्मतनुः
सूक्ष्मरूपवानरः १ सीतान्वेषणकार्यार्थी सीतान्वेषणरूपकार्ये छावान् विविच्य दृष्ट्वा २ ततो लंका

वाक्ये स्मृत्वा हनूमान् शीघ्रं जगाम ३ सुरपा
दपाः कल्पवृक्षादयः ४

रा॰म॰
४

फलैरानम्राणि शाखाग्राणि येषां तैः पादपैः ५ अभ्रलिहमत्युच्चं चैत्यप्रासादं देवतास्थानविशेषं अ
त्युच्चत्वान्मणिस्तंभादिषु तत्वाच्च वि[illegible]स्मयं ६ समतीत्येति चैत्यप्रासादमिति शेषः ७ अत्यंतं निवि
डपत्रत्वादेवादृष्टः अतपो यत्र जनैस्तं स्वर्णविहंगमैः पक्षिभिः आकीर्णं व्याप्तमित्यर्थः मयूरव्यंसका

फलैरानम्रशाखाग्रपादपैः परिवारितं । विचिन्वन्जानकीं तत्र प्रति वृक्षं मरुत्सुतः ५
ददर्शाभ्रलिहं तत्र चैत्यप्रासादमुत्तमं । दृष्ट्वा विस्मयमापन्नो मणिस्तंभसमन्वितं ६ से
मतीत्य पुनर्गत्वा किंचिद्दूरं समारुतिः । ददर्श शिंशुपावृक्षमत्यंतनिबिडच्छदं ७ अदृष्टातप
माकीर्णं स्वर्णवर्णविहंगमं । तन्मूले राक्षसीमध्ये स्थितां जनकनंदिनीं ८ ददर्श हनुमान्वी
रो देवतामिव भूतले । एकवेणीं कृशां दीनां मलिनांबरधारिणीं ९ भूमौ शयानां शोचंतीं राम
रामेति भाषिणीं । त्रातारं नाधिगच्छंतीमुपवासकृशां शुभां १० शाखांतच्छदमध्यस्थो ददर्श क
पिकुंजरः । कृतार्थोहं कृतार्थोहं दृष्ट्वा जनकनंदिनीं ११ मयैव साधितं कार्यं रामस्य परमात्म
नः । ततः किलकिलाशब्दो बभूवांतः पुराद्बहिः १२

९ दित्वान्समासः एकवेणीं हरणदिनावधि संस्का
ररहितामित्यर्थः यद्वा शोभार्थमन्यदा वेणीत्रयबंधः पुरतो द्वयं पश्चादेकेति संप्रति तु संस्काररहित्यात्स्पृष्ट
लंघिनीमेकैवेत्यर्थः दीनां स्वजनविरहादीनामिति ९ शोचंती आत्मानं शोचंती १० शाखानामंते प्रांते ये छदाः प

त्राणि तेषां मध्यस्थः तद्दर्शनजानंदाभिनं
दाभिनयः कृतार्थ इत्याह हि ११ १२

रा० अ० सुं किमेतत् किंजन्योयं शब्दः १३ अलीयत तद्दर्शनेन करिष्यमाणकार्यभंगनियेतिभावः १४ १५ इत्येवंचिं
५ तयन् रावणो राघवे रोति श्लोकोक्तं चिंतयन् नित्यं सदा हृदि राममेव ध्यायन्नास्त इतिशेषः अतस्तस्मि
न्दिनेऽपररात्रौ हनूमत्प्रवेशदिनरात्रिसंबंध्यपररात्र इत्यर्थः समासांताभावस्तदनित्यत्वात् १६ स्व

किमेतदिति संलीनो वृक्षपत्रेषु मारुतिः आयांतं रावणं तत्र स्त्रीजनैः परिवारितं १३ दशास्यं
विंशतिभुजं नीलांजनचयोपमं दृष्ट्वा विस्मयमापन्नो पत्रखंडेष्वलीयत १४ रावणो राघवेण
शुमरणं मे कथं भवेत् सीतार्थमपि नायाति रामः किंकारणं भवेत् १५ इत्येवं चिंतयन्नित्यं रा
ममेव सदा हृदि तस्मिन्दिनेऽपररात्रौ रावणो राक्षसाधिपः १६ स्वप्ने रामेण संदिष्टः कश्चिदाग
तवानरः कामरूपधरः सूक्ष्मो वृक्षाग्रस्थो नुपश्यति १७ इति दृष्ट्वाद्भुतं स्वप्नं स्वात्मन्येवानुचिंत्य
सः स्वप्नः कदाचित्सत्यः स्यादेवं तत्र करोम्यहं १८ जानकीं वाक्शरैर्विद्ध्वा दुःखितां नितरामहं
करोमि दृष्ट्वा रामाय निवेदयतु वानरः १९

॥ ते निश्वसमये रामादिष्टः कश्चिद्वानरो लंको मागत्य वृक्षाग्र
स्थो नुपश्यति सीतामिति ददर्शेतिशेषः १७ इति अद्भुतं स्वप्नं दृष्ट्वा अयं स्वप्नः कदाचित्सत्यो भवेत् अत [illegible] ८
स्तत्र सीतासमीपं गत्वा एवं करोमीति अचिंतयदितिशेषः १८ यदि चिंतयन्तदाह जानकीमिति विद्ध्वेति रा० सुं०
स्यवार्थः तां वाक्शरैर्विधाय नितरां दुःखितां करोमि तद्दृष्ट्वा वानरो रामाय निवेदयतु एवं हि रामः शीघ्रमा ५

नूपुराणि पादभूषणानि किंकिणी जघनभूषणानि सिंजितं शब्दं २० भीता सीता रूपा गना स्वात्मन्येव स्वश
रीरे एव लीयमाना स्थिता स्यान्वयः मे पिपिं स्यापितं मांतरं चिंतया २१ किमाह तदाह सुमध्यमेइत्यादि
२२ २३ लोकाचाररूपाः प्रयत्नेन समंततः वीक्षमाणा अपि रामं न पश्यंति २४ त्वयि निस्पृहे णइ

इत्येवं चिंतयन् सीता समीपमगमद्द्रुतं नूपुराणां किंकिणीनां श्रुत्वा सिंजितमंगना २० सी
ता भीता लीयमाना स्वात्मन्येव सुमध्यमा मां दृष्ट्वा किं वृथा सुभ्रु स्वात्मन्येव विलीयसे २२
+ अधोमुख्य श्रुनयना स्थिता रामार्पितांतरा २१ रावणेपित दासीता माता क्या ह सुमध्यमे +
एमो वनचराणां हि मध्ये तिष्ठति सानुजः कदाचिद्दृश्यते केश्चित्कदाचिन्नैव दृश्यते २३ मया
तु बहुधा लोकाः प्रेषितास्तस्य दर्शने न पश्यंति प्रयत्नेन वीक्षमाणाः समंततः २४ किं करिष्य
सि रामेण निस्पृहेण सदा त्वयि त्वया सदालिंगितोपि समीपस्थोपि सर्वदा २५ रामः रामः

छाहीनेन पूर्णकामत्वाद्दिस्यांतरोर्थः त्वया दालिंगितोपि ध्यानेन सदा हृदि चिंतनात् अत एव समीपस्थो
पि यदा ज्ञाप्तिज्ञाप्ति मनोरमेदालिंगितो विभुत्वाच्च समीपस्थो यद्यपि २५ रामरामरामरामराम

रा॰अ॰मुं॰ तथाप्यस्य रामस्य हृदये त्वयि त्वत्त्विषस्नेहो न जायते अत एवेयत्कालं त्वदुपेक्षा तस्येति भावः सर्वत्र स
६ मत्वात्तस्य न क्वापि स्नेह इति तत्त्वं किंच त्वत्कृतान् सर्वभोगान् त्वया स्ववृत्तिद्वारोपनीतान् सर्वभोगान् स
र्वविषयान् तपोत्वत्कृतान् सुखसंकल्पकामादीन् भुंजानोपि अहं भोक्तेति न जानाति तथाभिमानराहि
त्यात् अत एव कृतघ्नः अत एव निर्गुणः यो हि गुणवान् स उपकारमन्तुत एव अधमः उपकारविस्मर

इत्येवंचिंतयन्सीता हृदयेस्य न च स्नेह त्वयि रामस्य जायते त्वत्कृतान् सर्वभोगांश्च त्व
द्गुणान् न पि राघवः २६ भुंजानोपि न जानाति कृतघ्नो निर्गुणोऽधमः त्वमानीता मया साध्वी दुःख
शोकसमाकुला २७ इदानीमपि नायाति भक्तिहीनः कथं व्रजेत् निःसत्वो निर्ममो मानी मूढः
पंडितमानवान् २८ नराधमं त्वद्धि सुखं किं करिष्यसि भामिनि त्वय्यतीव समासक्तं मां भज
स्वासुरोत्तमं २९ देवगंधर्वनागानां यक्षकिंनरयोषितां भविष्यसि नियोक्त्री त्वं यदि मां प्रतिप
द्यसे ३०

णात् किंचन धनं धमतिरात्म विषयो भवतीत्यधनः शार्ङ्गीबाल्य इति यावत् कृतघ्नत्वाद्युपपादयति रा॰म॰
त्वमिति २६ २७ यतः त्वयि भक्तिहीनो अतः कथं व्रजेत् स्वस्थानतः स्वचरित्राणां यं इमं देशं निःसत्वः ६
निःसत्वो निर्बलः निर्ममो ममताहीनः त्वयि इयं ममेति बुद्धिहीनः २८ नराधमं पंचमषष्ठ्ये वहुव्रीहिरि

ति कच्चित् किं करिष्यसि तादृशोऽनुरागेण किंप्रयोजनमित्यर्थः असुरोत्तमं इति नराधमव्यक्तउक्तः २९
देवगंधर्वनागानां तद्योषितमित्यर्थः नियोक्त्रीः प्रभुतया आज्ञापयित्री प्रतिपद्यसे अंगीकरोषि ३० नि
धाय तत्क्षणमंतरे पतिव्रतायाः साक्षात्परपुरुषेण वार्त्तालापस्यानौचित्यादित्याद्दितिभावः ३१ शुनीवेत्युप
मयाक्रोत्यंतं पराक्रमणहिंसं सूचितं ३२ अचिरादिति छेदः अल्पेनैव कालेनेत्यर्थः यदा राम शराघा

एवमस्य वचः श्रुत्वा सीतामर्षसमन्विता उवाचाधोमुखी भूत्वा निधाय तृणमंतरे ३१
राघवाद्विभ्यतानूनं भिक्षुरूपं धृतं त्वया रहिते राघवाभ्यां त्वं शुनीव हविरध्वरे ३२ हृतवाने
सि मां नीच तत्फलं प्राप्स्यसे चिरात् यदा रामशराघातविदारितवपुर्भवान् ३३ ज्ञास्यसे मानु
षं रामं गमिष्यसि यमांतिकं समुद्रं शोषयित्वा वा शरैर्बध्वाथ वारिधिं ३४ हंतुं त्वां समरे
रामो लक्ष्मणेन समन्वितः आगमिष्यत्यसंदेहो द्रक्ष्यसे राक्षसाधम ३५ त्वां सपुत्रं सहब
लं हत्वा नेष्यति मां पुरं श्रुत्वा रक्षपतिः क्रुद्धो जानक्याः परुषाक्षरं ३६

तैर्विदारितवपुर्भूत्वां भवान् भविष्यतीति शेषः ३३ तदा रामं मानुषं ज्ञास्यसि यमांतिकं च गमिष्यसि श
रैः समुद्रं शोषयित्वा अथवा वारिधिं बध्वा सेतुबंधेनेति शेषः तदागमनं च त्वमनुपदमेव द्रक्ष्यसे
इत्यन्वयः ३५ जानक्याः परुषाक्षरं वाक्यं श्रुत्वा क्रुद्धोऽभवत् इति शेषः ३६ राम राम॥

रा०अ०सुं० ८ ततः क्रोधसमाविष्टः खड्गमुद्यम्य जनराजतनयां हंतुमुद्यतो भवदिति शेषः ३७ अन्यानुरक्तत्वात्त्वद्वियो
गाच्च दैन्यादिविशिष्टां ३८ यः त्वामेव वरयंति ताव ह्यासंतीति योजना मदेन काममदेन मते मद्धपु
क्तउ विलोचने यासां ताः ३९ सकामना मद्विषयकामनासहिता सती ४० यथा मे वशगा भविष्य

वाक्यं क्रोधसमाविष्टः खड्गमुद्यम्य सत्वरः हंतुं जनकराजस्य तनयां ताम्रलोचनः ३७
मंदोदरी निवार्याह पतिं पतिहिते रता त्यजैनां मानुषीं दीनां दुःखितां कृपणां कृशां ३८ देव
गंधर्वनागानां बह्व्यः संति वरांगनाः त्वामेव वरयंत्सुच्चैर्मदमत्तविलोचनाः ३९ श्रुत्वा मंदो
दरीवाक्यं रावणः शांतमानसः ततोऽब्रवीद्दशग्रीवो राक्षसीर्विकृताननाः ४० यथा मे वशगा
सीता भविष्यति सकामना तथा यतध्वं त्वरितं तर्जनादरणादिभिः ४० द्विमासाभ्यंतरे सी
ता यदि मे वशगा भवेत् तदा सर्वसुखोपेता राज्यं भोक्ष्यति सा मया ४१ यदि मासद्वयादूर्ध्वं
मच्छय्यां नाभिनंदति तदा मे प्रातराशाय हत्वा कुरुत मानुषीं ४२ इत्युक्त्वा प्रययौ स्त्रीभी रा
वणोंऽतःपुरालयं राक्षस्यो जानकीमेत्य भीषयंत्य स्वतर्जनैः ४३ तत्रैका जानकीमाह यौवनं
ते वृथागतं रावणेन समासाद्य सफलं तु भविष्यति ४४ राम०

॥तिन तु बल्ला तथा यतध्वमित्यन्वयः त
र्जनं भीषणं आदरणं सांत्वं ४१ कुरुत पक्वां कुरुतेत्यर्थः ४३ स्वतर्जनैः स्वबुद्धिकल्पितभीषणोपायैः
स्वक्रौर्ययोग्यैर्वा इदं सांत्वं स्याप्युपलक्षणं तदेवाह तत्रैकेति ४४

भीषणान्याह अपराचेति किं विलंबेन अस्या वधे इति शेषः जानकीं इदानीमेव छेद्यतां अस्या अंगं पृथक् पृथक् विभज्य पश्यतामिति शेषः ४५ ४६ मद्वाक्यं यत् शृणुध्वं यत् श्रुतं सत् वो हितं भवेत् ४८ वाक्यमाह इदानीमेव मया रामः स्वप्ने दृष्टः इत्यन्वयः ४९ कथं दृष्टस्तदाह आरुह्येति इति समाग

अपराचाह कोपेन किं विलंबेन जानकी इदानीं छेद्यतामंगं विभज्य च पृथक् पृथक् ४५
अस्यास्तु खड्गमुद्यम्य जानकीं हंतुमुद्यता अन्याकरालवदना विदार्यास्यमभीषयत् ४६
एवं तां भीषयंतीस्ता राक्षसीर्विकृताननाः निवार्य त्रिजटा वृद्धा राक्षसी वाक्यमब्रवीत् ४७
शृणुध्वं दुष्टराक्षस्यो मद्वाक्यं वो हितं भवेत् ४८ न भीषयध्वं रुदतीं नमस्कुरुत जानकीं इ
दानीमेव मे स्वप्ने रामः कमललोचनः ४९ आरुह्यैरावतं शुभ्रं लक्ष्मणेन समागतः दग्ध्वा लं
कां पुरीं सर्वां हत्वा रावणमाहवे ५० आरोप्य जानकीं स्वांके स्थितो दृष्टो गमूर्धनि रावणो गोम
यहृदे तैलाभ्यक्तो दिगंबरः ५१ अगाहत्पुत्रपौत्रैश्च कृत्वा वदनमालिकां बिभीषणस्तु रा
मस्य सन्निधौ हृष्टमानसः ५२

तः संयुक्तः ५० स्वांके जानकीमारोप्य आगत्य पर्वतस्य मूर्ध
नि ऊर्ध्वभागे स्थितो दृष्टः एवं रामविषयं शुभस्वप्नमुक्त्वा रावणविषयमनिष्टस्वप्नमाह रावण इति
५१ वदनमालिकां स्वमुंडमालां स्वहस्ते

हत्वाऽगाहदित्यर्थः नन्वेवं किं लंकाऽप्यसेवं भविष्यतीत्याशंक्यनेत्याह विभीषणाइति रामस्य सेवां करो
ति एवंविधः स्वभेदृष्टेः ततः सोत्र राज्ये कर्त्तेत्याह सर्वथेत्यादि ५२ ५३ ५४ ५५ त्रातारमप्राप्नुवती दुःखे
न मूर्छं मूर्छितेवाश्रुयुक्तनेत्राचिंतयंती रमात्मना सहाब्रवीत् ५६ ५७ मत्तोऽहंत निश्चयामरणस्यकंचि
दुपायंकमप्युपायायमजानती शाखामालंब्य चिरायातिष्ठदितिशेषः ५८ इतिश्रीमदध्यात्मरा

सेवां करोति रामस्य पादयोर्भक्तिसंयुतः सर्वथा रावणं रामो हत्वा सकुलमंजसा ५३ विभी
षणायाधिपत्यं दत्वासीतां शुभाननां अंके निधाय स्वपुरीं गमिष्यति न संशयः ५४ त्रिजटा
यावचः श्रुत्वा भीतास्ता राक्षसस्त्रियः तूष्णीमासंस्तत्र तत्र निद्रावशमुपागताः ५५ तर्जिता
राक्षसीभिः सा सीता भीतातिविह्वला त्रातारं नाधिगछंती दुःखेन परिमूर्छिता ५६ अश्रु
भिः पूर्णनयना चिंतयंतीदमब्रवीत् प्रभाते भक्षयिष्यति राक्षस्यो मां न संशयः ५७ इदानीं
मेव मरणं केनोपायेन मे भवेत् एवं सुदुःखेन परिप्लुता सा विमुक्तकंठं रुदती चिराय आलंब्य
शाखां हृतनिश्चया मृत्यौ न जानती किंचिदुपायमंगना ५८ इतिश्रीमदध्यात्मरा॰ सुंदरकांडे द्वि
तीयः सर्गः २
मायणीस्यटीकायां रामवर्मणः कृतौ सुंदरकांडे द्वितीयः सर्गः २ तत्र स्तदुपायं निश्चित्याहोद्बंधने
नवेति १ उद्बंधनसाधनमाह दीर्घावेणीति अथानंतरं एवं मरणोपायनिश्चितबुद्धिं जानकीं वि
लोक्येत्यन्वयः २

किंचिद्विचार्यश्रयेवचनावसरइ तिनिश्चित्यसूक्ष्मरूपः सनैर्जानक्यास्तस्या एवश्रोत्रगं यथाभवति
तथा शनैरभाषतेस्यन्वयः ३ तद्वचआह इक्ष्वाकिति ४ लक्ष्मणैःसामुद्रिकोक्तोत्तमलक्षणैः भरतघ्र

उद्वंधनेनवामोह्यपश्चारीरंराघवंविना जीवितेनफलंकिंस्यान्ममरक्षोधिमध्यतः १ दीर्घा
वेणीममात्यर्थमुद्बंधायभविष्यति एवंनिश्चितबुद्धिं तांमरणायाथजानकीं २ विलोक्यह
नुमान्किंचिद्विचार्यैतदभाषत शनैःशनैः सूक्ष्मरूपोजानक्याःश्रोत्रगंवचः ३ इक्ष्वाकु
४ धि वंशसंभूतोराजादशरथोमहान् अयोध्याधिपतिस्तस्यचत्वारोलोकविश्रुताः ४ पुत्रादेव
समाः सर्वेलक्षणैरुपलक्षिताः रामश्चलक्ष्मणश्चैवभरतश्चैवशत्रुहा ५ ज्येष्ठोरामःपितुर्वा
क्याद्दंडकारण्यमागतः लक्ष्मणेनसहभ्रात्रासीतयाभार्ययासह ६ उवासगौतमीतीरेपंच
वट्यांमहामनाः तत्रनीतामहाभागासीताजनकनंदिनी ७ रहितेरामचंद्रेणरावणेनदुरात्मना
ततोरामोतिदुःखार्त्तोमार्गमाणोथजानकीं ८ जटायुषंपक्षिराजंअपश्यत्पतितंभुवि तस्यैद
त्वादिवंशीघ्रंऋष्यमूकमुपागमत् ९ सुग्रीवेणकृतामैत्रीरामस्यविदितात्मनः तंभ्रार्याहारि
णंहत्वावालिनंरघुनंदनः १०

त्रुघ्नाख्यइत्यर्थः ५ ६ रावणेननीतेत्यन्वयः ७ मार्गमाणः अन्वेषयन ८ दिवंस्वर्लोकंतत्लोकवासमि
तियावत् ९ रामस्यसंकल्पमात्रासर्वसाधकस्यनवानमैत्र्याप्रयोजनमित्यौद्धत्यपरिपरिहाराय सुग्रीवे

णहृतेत्युक्तं नतु रामेण हृतेति तन्द्रार्याहारिणं
सुग्रीवभार्याहारिणं १०

रा०अ०सुं० मित्रकार्यं सुग्रीव हृत मित्रत्व कार्यं समानीयनानापर्वतादितैर्वानरान् किष्किंधासमानाप्य ११ तान्वान
९ रान्सीतायाः परिमार्गणे तन्निमित्तं परितः प्रेषयामासेत्यन्वयः १२ समुद्रमुल्लंघ्य लंकानगरीं दृष्ट्वा तत्र जा
नकीं विचिन्वन् अन्वेषयन् शनैः क्रमेण अशोकवनिकां दृष्ट्वा तत्र तां विचिन्वन् शिंशुपातरुं दृष्ट्वा

राज्येऽभिषिच्य सुग्रीवं मित्रकार्यं चकार सः सुग्रीवस्तु समानाय्य वानरान्वानरप्रभुः ११ प्रेष
यामास परितो वानरान्परिमार्गणे सीतायास्तत्र चैकोऽहं सुग्रीवसचिवो हरिः १२ संपाति
वचनाच्छीघ्रं सुलंघ्य शतयोजनं समुद्रं नगरीं लंकां विचिन्वन् जानकीं शुभां १३ शनैरं
शोकवनिकां विचिन्वन् शिंशुपातरुं अद्राक्षं जानकीमत्र शोचंतीं दुःखसंप्लुतां १४ रामस्य
महिषीं देवीं कृतकृत्योऽहमागतः इत्युक्त्वा विररामाथ मारुतिर्बुद्धिमत्तरः १५ सीता क्रमेण
तत्सर्वं श्रुत्वा विस्मयमाययौ किमिदं मे श्रुतं व्योम्नि वायुना समुदीरितं १६ स्वप्नो वा मे म
नोभ्रांतिर्यदि वा सत्यमेव तत् निद्रा मे नास्ति दुःखेन जानाम्येतत्कुतो भ्रमः १७

॥न् अत्र शिंशुपामू
ले जानकीमद्राक्षं अतोऽत्रागतोऽहं कृतकृत्यः सदृत्तइतिशेषः १३ १४ १५ वायुनेति तस्य जगत्क्रियासाक्षि
त्वात्तेन कथितत्वसंभावना १६ स्वप्नो वेसोहदिविकल्पत्रयं सत्य स्वभ्रांतिरिक्त किंचित्कर्तृकं वाक्य
मित्यर्थः तत्र दुःखहेतुना निद्राभावात् स्वप्नस्यासंभवः भ्रमोऽपि नो स्याह जानाम्येत एव स्यादार्थ

राम० ९

तस्मात्त्वमेव निश्चिन्तः स्याहयेनेति सममायतो दृश्यतां मम मायतो भूत्वात्मानं दर्शयित्वेत्यर्थः १८ पत्ररवं
उतः पत्रसमूहः कलविंकः चटकः भाषायां चिमनी चटकः कलविंकः स्यात्तस्य स्त्री चटका तयोः उप
पत्ये चाटकैरस्मयत्ये चटकैव हि रित्यमरः पीतवर्णो वानरः पीतवानरः २० २१ शंकां रावणात्वशंकां

येनमेकर्णपीयूषं वचनं समुदीरितं सदृश्यतां महाभागः प्रियवादी ममायतः १८ श्रुत्वा
तज्जानकीवाक्यं हनुमान्पत्ररवंडतः अवतीर्य शनैः सीतापुरतः समवस्थितः १९ कलविं
कप्रमाणं गोरक्तास्यः पीतवानरः ननाम शनकैः सीतां प्रांजलिः पुरतःस्थितः २० दृष्ट्वा तं जा
नकी भीता रावणोयमुपागतः मां मोहयितुमायातो मायया वानराकृतिः इत्येवं चिंतयित्वा
सा तूष्णीमासीदधोमुखी पुनरप्याह तां सीतां देवि यत्त्वं विशंकसे २२ नाहं तथाविधो मात
स्त्यज शंकां मयि स्थितां दासोहं कोसलेंद्रस्य रामस्य परमात्मनः २३ सचिवोहं हरींद्रस्य सु
ग्रीवस्य शुभप्रदे वायोः पुत्रोहमखिलप्राणभूतस्य शोभने २४ तच्छ्रुत्वा जानकी प्राह ह
नुमंतं कृतांजलिं वानराणां मनुष्याणां संगतिर्घटते कथं २५

१परमात्मन इति तत्त्वरूपाभिज्ञ
त्वेन तद्दासत्वसत्यता प्रत्यापनाय २३ २४ २५ श्रीदामोदरायनमोनमः श्रीरामायनमोनमः

ए॰ अ॰ सुं॰ यथात्वं दासोहमिति भाषसे तथा वानरमनुष्ययोः संमतिः प्रतीयते सा त्वत्र कथं घटत इत्यर्थः २६ शा
१० वर्येति भगवता त्वद्वृत्तांते सबरीप्रतिदृष्टे सती तया सुग्रीवसमीपं गच्छ स सीतामार्गणं करिष्यतीति
तयोद्दिष्टत्यर्थः भीतो वालिप्रेरितत्वभ्रांत्या २८ तौ रामलक्ष्मणौ सख्यं अकरवं कारितवानित्यर्थः

यथा त्वं रामचंद्रस्य दासोहमिति भाषसे तामाह मारुतिः प्रीतो जानकीपुरतः स्थितः २६ ऋ
ष्यमूकमगाद्रामः शबर्यानोदितः सुधीः सुग्रीवो ऋष्यमूकस्थो दृष्टवान् रामलक्ष्मणौ २७
भीतो मां प्रेषयामास ज्ञातुं रामस्य हृद्गतं ब्रह्मचारी वपुर्धृत्वा गतोहं रामसन्निधिं २८ ज्ञा
त्वा रामस्य सद्भावं स्कंधौ परिनिधाय तौ नीत्वा सुग्रीवसामीप्यं सख्यं चाकरवं तयोः २९
सुग्रीवस्य हृता भार्या वालिना तं रघूत्तमः जघानैकेन बाणेन ततो राज्येभ्यषेचयत् ३० सुग्री
वं वानराणां सः प्रेषयामास वानरान् ३१ दिग्भ्यो महाबलान्वीरान् भवत्याः परिमार्गणे गच्छंतं
राघवो दृष्ट्वा मामभाषत सादरं ३२ त्वयि कार्यमशेषं मे स्थितं मारुतनंदन ब्रूहि मे कुशलं स
र्वं सीतायै लक्ष्मणस्य च ३३
॥ अंतर्भावितण्यर्थः २९ तं वालिनं जघान वानराणां राज्येभ्यषेचय
त् सुग्रीवरित्यन्वयः स सुग्रीवो भवत्याः परिमार्गणे तन्निमित्तं वानरान् प्रेषयामास ३१ ३२ अशेषं

कांक्षितं त्वयि स्थितं तथैव मत्कलकार्यमस्य
तेन समपर्ठः समम ३३
राम
१०

मे एतदंगुलीयकं सीतायै परिज्ञानार्थं रामाय एवायमिति निश्चितार्थं दीयतां मत्वा माक्षरमुद्रितं मन्नामाक्ष
रमुद्रया युतं ३४ नमस्कृत्वा मुद्रिकां ददौ पुनर्नमस्कृत्वा च दूरास्थितः अनेन दानवेलायां चित्समीपउपस
प्ररतिज्ञामुपते ३५ मुद्रिकां दृष्ट्वा प्रमुदितो जाततः शिरसा धृता स्त्रवदानंदनेत्रजा जातास्त्रवंती आनंदे

अंगुलीयकमेतन्मे परिज्ञानार्थमुत्तमं सीतायै दीयतां साधु मन्नामाक्षरमुद्रितं ३४ इत्युक्त्वा
प्रददौ मह्यं करात्स्वादंगुलीयकं प्रयत्नेन मयानीतं देवि पश्यांगुलीयकं ३५ इत्युक्त्वा प्रददौ
देव्यै मुद्रिकां मारुतात्मजः नमस्कृत्वा स्थितो दूराद्बद्धांजलिपुटो हरिः ३६ दृष्ट्वा सीता प्रमुदिता
रामनामांकितां तदा मुद्रिकां शिरसा धृत्वा स्त्रवदानंदनेत्रजा ३७ कपे मे प्राणदाता त्वं बुद्धिमा
नसि राघवे भक्तोसि प्रियकारी त्वं विश्वासोस्ति तवैव हि ३८ नो चेन्मत्सन्निधिं चान्यं पुरुषं प्रे
षयेत्कथं हनूमन्दृष्टमखिलं मम दुःखादिकं त्वया ३९ सर्वं कथय रामाय यथा मे जायते द
या मासद्वयावधि प्राणाः स्थास्यंति मम सत्तम ४० नागमिष्यति चेद्रामो भक्षयिष्यति मां खलः
अतः शीघ्रं कपींद्रेण सुग्रीवेण समन्वितः ४१

॥ ननेत्रजान्यश्रूणि यस्याः सा ३६ कपे मुद्रिकारक्ष
णात् बुद्धिमांस्त्वं मे प्राणदातासि राघवे भक्तोसि तस्य प्रियकारी चासि अतो राघवस्य तवैव विश्वासोस्तीति म
न्ये ३७ विश्वासस्तत्तां युक्त्या साधयति नो चेदिति नो चेत्त्वयि विश्वासश्चेन्न स्यात् तदान्य विश्वस्तं पु

रा० अ० सुं० ११

रुषरूपं त्वां कथं मत्स्वं निधिं प्रेषयत् ३८ ३९ यथा मे मपि राघवस्य दयाजायते तथा सर्वे राक्षसीकृततर्जनादिकं
पयेत्यर्थः मासद्वये रिति अग्रे मरणमेव त्वदर्थे एव रावणेन तथा प्रतिज्ञा कृत्वादिति भावः ४० तदेवाहनाग
मिष्यतीति ४१ वानरानीकपैः सार्धमत्रागत्य रावणं मुख्यविशेषणं हत्वा यदि मां प्रभुर्मोचयेत् तत्कृतवधेना

त्तत्तस्य सदृशं वीर्यं वीर वर्ण्यवर्णितं + वानरानीकपैः सार्धं हत्वा रावणमाहवे सपुत्रं सबलं
रामो यदि मां मोक्षयेत्प्रभुः ४२ + यथा मां तारयेद्रामो हत्वा शीघ्रं दशाननं ४३ तथा यतस्व
हनुमन्वाचा धर्ममवाप्नुहि हनुमानपि तामाह देवि दिष्ट्या यथा मया ४४ रामः सलक्ष्मणः शी
घ्रमागमिष्यति सायुधः सुग्रीवेण ससैन्येन हत्वा दशमुखं बलात् ४५ समानेष्यति देवि
त्वामयोध्यां नात्र संशयः तमाह जानकी रामः कथं वारिधिमाततं ४६ तीर्त्वा यास्यत्यमे
यात्मा वानरानीकपैः सह हनूमानाह मे स्कंधावारुह्य पुरुषर्षभौ ४७ आयास्यतः ससै
न्यश्च सुग्रीवो वानरेश्वरः विहायसा क्षणेनैव तीर्त्वा वारिधिमाततं ४८ निर्दहिष्यति रक्षो
घान्त्वत्कृते नात्र संशयः अनुज्ञां देहि मे देवि गच्छामि त्वरयान्वितः ४९

॥दितिशेषः ४२ ततदा
वीरैर्वर्ण्यं ब्राह्मणैश्च वीर्यं तं तस्य वीर्यसदृशं भवेत् यथा वर्णितं भवेत् अन्यथा विपरीतमेवेत्यर्थः ४३
अतस्तथेति वाचा वचनकृतरामप्रेरणया धर्मं बंदीमोक्षजं यथा दृष्टो यथारूपा दृष्टाः स्त यजाने शीघ्र

किष्किंधे ७ आनंदविलासींतें ५८ ४९

मागमिष्यतीत्यर्थः ४४ ४५ तं हनुमंतं जानकी
आहरामः सह हनुमान् ४७ हनुमानाह मे स्कंधौ

राम ११

भ्रात्रा सह रामं द्रष्टुं गच्छामि गत्वा च तवांतिकमागंतुं त्वरयामि यथा मां विश्वसेत् जानकी सर्वथा दृष्ट्वानिति
तथा किंचिदभिज्ञानं देहि ५० ५१ ५२ ५३ ऐंद्रः इंद्रलोकस्थः काकरूपधर इंद्रपुत्र इत्यर्थः आमिषं मां
सं ५४ एतत् त्वत्पादांगुष्ठविदारणरूपं ५५ मां पुनरभिद्रवंतमित्यन्वयः रक्तमांसं नखतुंडं यस्य तं ५६

द्रष्टुं रामं सह भ्रात्रा त्वरयामि तवांतिकं देवि किंचिदभिज्ञानं देहि मे येन राघवः ५० विश्वसेन्मां
प्रयत्नेन ततो गंता समुत्सुकः ततः किंचिद्विचार्याथ सीता कमललोचना ५१ विमुच्य केशपा
शांते स्थितं चूडामणिं ददौ अनेन विश्वसेद्रामस्त्वां कपींद्र सलक्ष्मणः ५२ अभिज्ञानार्थम
न्यच्च वदामि तव सुव्रत चित्रकूटगिरौ पूर्वमेकदा रहसि स्थितः मदंके शिर आधाय निद्रा
ति रघुनंदनः ५३ ऐंद्रः काकस्तदागत्य नखैस्तुंडेन चासकृत् मत्पादांगुष्ठमारक्तं विददार
मिषाशया ५४ ततो रामः प्रबुध्याथ दृष्ट्वा पादं कृतव्रणं केन भद्रे कृतं चैतद्विप्रियं मे दुरात्म
ना ५५ इत्युक्त्वा पुरतोपश्यद्वायसं मां पुनः पुनः अभिद्रवंतं रक्तास्यं नखतुंडं चुकोप ह ५६
तृणमेकमुपादाय दिव्यास्त्रेणाभियोज्य तत् चिक्षेप लीलया रामो वायसोपरि तत् ज्वलत्
५७ अभ्यद्रवद्वायसं भीतो लोकान्भ्रमन् पुनः इंद्रब्रह्मादिभिश्चापि न शक्यो रक्षितुं तदा ५८

५७ ज्वलत् अभिमंत्रितं त्रिगुणं वायसमभ्यद्रवत् स वायसो भीतः लोकान् येन्द्रान् ब्राह्मांस्तत्र भ्रमन् तत्र तै
रपि यदा रक्षितं न शक्यो नाभवत् तदा ५८ रामरामरामरामरामरामरामरा रामरामरामरामरामरामः॥

रामपादाग्रेपतत् ५९ ततः काको गत इति शेषः एवं पौरुषवानपि स राघवः इदानीमपि एवमवस्थायामपि य
दुपेक्षते तत्किमर्थः ६० ६१ जानाति वर्त्तमानसामीप्ये लट् ज्ञास्यतीत्यर्थः ६२ यथा त्वं सूक्ष्मवपुस्तथा सर्वे
पि वानरा मवादृशाः भवद्वदेव सूक्ष्मवपुष इति महावपुर्भिः राक्षसैर्युद्धमसंभवीत्यर्थः ६३ श्रुत्वा तद्वचनं

रामस्य पादयोरग्रे पतद्भीत्या दयानिधेः शरणागतमालोक्य रामस्तमिदमब्रवीत् ५९ अमोघ
मेतदस्त्रं मे दत्त्वैकाक्षमितो व्रज सव्यं दत्वा ततः काक एवं पौरुषवानपि ६० उपेक्षते किमर्थं मा
मिदानीं सोपि राघवः हनूमानपि तामाह श्रुत्वा सीतानुभाषितं ६१ देवि त्वां यदि जानाति स्थिता
मत्र रघूत्तमः करिष्यति क्षणाद्भस्म लंकां राक्षसमंडितां ६२ जानकी प्राह तं वत्स कथं त्वं यो
त्स्यसे सुरैः अतिसूक्ष्मवपुः सर्वे वानराश्च भवादृशाः ६३ श्रुत्वा तद्वचनं देव्यै पूर्वरूपमद
र्शयत् मेरुमंदरसंकाशं रक्षोगणविभीषणं ६४ दृष्ट्वा सीता हनूमंतं महापर्वतसन्निभं
हर्षेण महताविष्टा प्राह तं कपिकुंजरं ६५ समर्थोसि महासत्व द्रक्ष्यंति त्वां महाबलं राक्ष
साः स्ते शुभः पंथा गच्छ रामांतिकं द्रुतं ६६

॥ सीताया इति शेषः देव्यै सीतायै ६४ ६५ त्वां राक्षसो
द्रक्ष्यंति दृष्ट्वा च रावणे कथयिष्यंति एवं सति को वेद किं भावीत्याशयः अतो रामांतिकं द्रुतं गच्छ ते यथाशु
भोस्त्विति शेषः ६६ ॥० ॥० ॥०॥ ०॥ ०॥ ०॥ ०॥ ०॥ ०॥ ०॥ ०॥ ०॥ ०॥०॥

कपिर्जानकीं प्राह हं बुभुक्षितोस्मि अतस्तव दर्शनान्मम पारणं मुचित मिति शेषः ननु चहं रिक्ता केन त्वां पार
यामीति शंकायामाह तव दृष्टौ स्थितै फलैर्मे पारणं भविष्यतीत्यर्थः ६७ ततस्तया प्रस्थापितो जानकी

बुभुक्षितः कपिःप्राह दर्शनात्पारणं मम भविष्यति फलैःसर्वैस्तव दृष्टौ स्थितैर्हि मे ६७ तथेत्युक्तः
स जानक्या भक्षयित्वा फलं कपिः ततः प्रस्थापितो गच्छज्जानकीं प्रणिपत्य सः ६८ किंचिद्दूर
मथो गत्वा स्वात्मन्येवानुचिंतयत् कार्यार्थमागतो दूतः स्वामिकार्याविरोधतः अन्यत्किंचि
दसंपाद्य गच्छत्यधम एव सः ६९ अतोहं किंचिदन्यच्च कृत्वा दृष्ट्वाथ रावणं संभाष्य च ततो
राम दर्शनार्थं व्रजाम्यहे ७० इति निश्चित्य मनसा वृक्षखंडान्महाबलः उत्पाट्याशोकवनिकां
निर्वृक्षाम करोत्क्षणात् ७१ सीताश्रयनगं त्यक्त्वा वनं शून्यं चकार सः उत्पाटयंतं विपि
नं दृष्ट्वा राक्षसयोषितः ७२ अपृच्छन् जानकीं कोसौ वानराकृति रुन्मदः ७३ ॥ ॥जानक्युवा
च भवत्य एव जानंति मायां राक्षस निर्मितां नाहमेनं विजानामि दुःखशोकसमाकुला ७४
इत्युक्तास्त्वरितं गत्वा राक्षस्यो भयपीडिताः हनूमता कृतं सर्वं रावणायन्यवेदयन् ७५

प्रणिपत्यागच्छत् अनुचिंतयत् अउभावश्चार्षः ६८ अन्यत्किंचित्स्वाम्याज्ञया रधिमुत्कृष्टं कर्मेत्यर्थः
६९ अन्यत्किंचित् वीरकर्म रावणं दृष्ट्वा संभाष्य चेत्यन्वयः ७० वृक्षखंडान् वृक्षसमूहान् उत्पाट्य नि

७२ ७३ दुःखशोकाभ्यां युक्ता हमेनं न जाना
मि ७४ ७५

र्वृक्षाम करोत् ७१ सीताश्रमनगं शिंशपावृ
क्षं शून्यं वृक्षैरिति शेषः विपिनं वनं दृष्ट्वा न्

रा॰अ॰सुं॰ वानराकृतिदेहभृत वानरदेहः सदृशो हृदेह इत्यर्थः वानरे एवं पराक्रमासंभवादेव मुक्तिः अशोकवनिकां स्र
९३ उत्पाद्य तैरेव चैत्यप्रासादं वभंज ७६ तस्थिवान् स्थितः महाप्रियं महच्च तदप्रियं चेत्यर्थः ७७ नियुतं दशको
टयः निर्भग्नो यश्चैत्यप्रासादः स्तस्य प्रथमे पदांतरं प्रथमां या भूमिस्तत्र संस्थितः ७८ लोहस्तंभ इव कृतमा

देवकृष्णिमहासत्वो वानराकृतिदेहभृत् सीतया सह संभाष्य ह्यशोकवनिकां क्षणात् उत्पा
२ भं द्य चैत्यप्रासादं बंजामितविक्रमः ७६ प्रासादरक्षिणः सर्वान्हत्वा तत्रैव तस्थिवान् तच्छ्रु
त्वा तूर्णमुत्थाय वनभंगं महाप्रियं ७७ किंकरान्प्रेषयामास नियुतं राक्षसाधिपः निर्भग्नचै
त्यप्रासादप्रथमांतरसंस्थितः ७८ हनुमान्पर्वताकारो लोहस्तंभकृतायुधः किंचिल्लांगूल
चलनो रक्तास्यो भीषणाकृतिः ७९ आपतंतं महासंघं राक्षसानां ददर्श सः चकार सिंहना
दं च श्रुत्वा ते मुमुहुर्भृशं ८० हनूमंतमथो दृष्ट्वा राक्षसा भीषणाकृतिं निर्जघ्नुर्विविधास्त्रौ
घैः सर्वराक्षससंघातिनं ८१ तत उत्थाय हनुमान्मुद्गरेण समंततः निष्पिपेष क्षणादेव म
शकानिव यूथपः ८२ निहतान्किंकरान् श्रुत्वा रावणः क्रोधमूर्छितः पंचसेनापतींस्तत्र प्रे
षयामास दुर्मदान् ८३

॰युधयेन सः किंचिल्लांगूलचलदिति स्वभावोक्तिः ७९ ते किंकरा नाम रा रा॰स॰
क्षसाः ८० भीषणाकृतिं हनूमंतं दृष्ट्वेत्यन्वयः ८१ मुद्गरेण लोहस्तंभः ८२ ८३ ॥ ॥ ॥ ९३

सखाराणः ८४ ८५ राक्षसान्रावणप्रेषितान् ८६ आकाशे प्रघमनुत्पपात तस्मिंतोगगनादवतार्यनमूर्ध्नि मुद्गरेण ताडयत् ८७ ८८ ८९ इंद्रजितं प्रति त्वं तं तु गछेति भग्पत्तरेणाह पुत्रेणाह पुत्रेति हत्वेत्युक्त्वाह मनाशक्य त्वं विचार्य

हनूमान पितान्सर्वान्लोहस्तंभेन चाहनत् ततः क्रुद्धो मंत्रिसुतान्प्रेषयामास राक्षसः ८४ आ
गतानपितान्सर्वांश्चपूर्ववद्वानरेश्वरः क्षणान्निःशेषतो हत्वा लोहस्तंभेन मारुतिः ८५ पूर्वस्थान
समाश्रित्य प्रतीक्षन्राक्षसान्स्थितः ततो जगाम बलवान्कुमारोक्षः प्रतापवान् ८६ तमुत्प
पात हनुमान्दृष्ट्वाकाशे ससुत्करः ८७ गगनात्वरितो मूर्ध्नि मुद्गरेणाभ्यताडयत् हत्वा तमक्षं निः
शेषं बलं सर्वं चकार सः ८८ ततः श्रुत्वा कुमारस्य वधं राक्षसपुंगवः क्रोधेन महताविष्ट इंद्रजे
तारमब्रवीत् ८९ पुत्र गछाम्यहं तत्र यत्रास्ते पुत्रहा रिपुः हत्वा तमथवा बध्वा आनयिष्यामि ते
ति कं ९० इंद्रजिल्पितरं प्राह त्यज शोकं महामते मयि स्थिते किमर्थं त्वं भाषसे दुःखितं वचः ९१
बध्वानेष्ये द्रुतं तात वानरं ब्रह्मपाशतः इत्युक्त्वा रथमारुह्य राक्षसैर्बहुभिर्वृतः ९२ जगाम वायु
पुत्रस्य समीपं वीरविक्रमः ततोतिगर्जितं श्रुत्वा स्तंभमुद्यम्य वीर्यवान् ९३ ॥ ॥ ॥ ॥

हत्वबध्वावेति ९० दुःखितं वचः अज्ञाकर्त्तुरभावे इवेति भावः ९१ ब्रह्मपाशतः ब्रह्मास्त्राभिमंत्रितैः पाशैरित्यर्थः
९२ हनुमंतं शिलीमुखैर्ध्वा सिंहनादमकरोदित्यन्वयः ९३ श्रीरामायनमोनमः श्रीरामायनमोनमः ॥०॥

विध्वेस्यस्यैवविवरणंशिरो भागमित्यादिभेदयित्वेत्यंतं ९४ ९५ सिंहनादोमकरोत्दिं[illegible]तिशेषः ९६ ९७ ९८ य
स्यरामनामयेप्राणिनोजपंतेते ऽज्ञानजन्यकर्मकृतंबंधनंसंसारंपरिमुच्यतेसंघएवशिलाख्यंतत्पदंसच्चिदानंदाख्यं
९९ तस्यरामस्यपदांबुजं ध्यात्वा मारुतिःयतः सदैवनिर्मुक्तानिसमस्तानिबंधनानिकर्म्माणि यस्यातादृशोभवति अ

उत्पपातनभोदेशंगरुत्मानिवमारुतिः ततोभ्रमंतंनभसिहनूमंतंशिलीमुखैः ९४ विध्वातस्य
शिरोभागंइषुभिश्चाष्टभिःपुनः हृदयंपादयुगलंषड्भिरेकेणवालधिं ९५ भेदयित्वाततोघोरं
सिंहनादमथाकरोत् ततोतिहर्षाद्धनुमान् स्तंभमुद्यम्यवीर्यवान् ९६ जघानसारथिंसाश्वं
रथंचाचूर्णयत्क्षणात् ततोन्यरथमादायमेघनादोमहाबलः ९७शीघ्रंब्रह्मास्त्रमादायबध्वा
वानरपुंगवं निनायनिकटंराज्ञोरावणस्यमहाबलः ९८ यस्यनामसततंजपंतियेऽज्ञानक
र्मकृतबंधनंक्षणात् सद्यएवपरिमुच्यतत्पदंयांतिकोटिरविभासुरं ९९ तस्यैवरामस्यपदां
बुजंसदाहृत्पद्ममध्येसुनिधायमारुतिः सदैवनिर्मुक्तसमस्तबंधनः किंतस्यपाशैरितरैश्च
बंधनैः १०० इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेसुंदरकांडेतृतीयःसर्गः ३

तस्तस्यपाशैरितरैर्वाबंधनैः किंदुःखमितिशेषः १०० इतिश्रीमत्सकलराजविपदुद्धरणेत्यादिविरुदावलीवि
राजमानस्यहिम्मतिवर्म्मणःपुत्रस्यश्रीरामवर्मणः कृताबध्यात्मरामायणसेतौ सुंदरकांडेतृतीयःसर्गः ३

धृतं स्वहस्तेन पाशबंधनयेन तादृशं विशेषेण भीतवत नगरं लंकां विलोकयंतं ईक्षितुं कपींद्रं दृष्टुं तमेवानुपश्चाद्याता
इति पौरविशेषणं १ क्षणमात्रसंगमः स्वसंबंधो यस्य तादृशमेनं हनूमंतं ब्रह्मास्त्रं कर्त्तृत्वा ब्रह्मवरेण त्वां मदस्त्रं
न पीडयिष्यतीति ब्रह्मदत्तवरेण सत्वरं गतं हनूमानत एव मनं ज्ञात्वापि फल्गुरज्जुभिर्धृतोपि विशेषस्य कर्त्तव्य रावण

श्रीमहादेव उवाच॥ यांतं कपींद्रं धृतपाशबंधनं विलोकयंतं नगरं विभीतवत् अताडयन्मुष्टितलैः सुकोपनाः पौराः
समंतादनुयांत ईक्षितुं १ ब्रह्मास्त्रमेनं क्षणमात्रसंगमं कृत्वागतं ब्रह्मवरेण सत्वरं ज्ञात्वा हनू
मानपि फल्गुरज्जुभिर्धृतोययौ कार्यविशेषगौरवात् २ सभांतरस्थस्य च रावणस्य तं पुरो निधाया स्य ३
ह बलारिजित्तदा बद्धो मया ब्रह्मवरेण वानरः समागतो नेन हता महासुराः ३ यदुक्तमत्रार्य वि
चार्य मंत्रिभिर्विधीयतामेष न लौकिको हरिः ततो विलोक्याह स राक्षसेश्वरः प्रहस्तमग्रे स्थितमं
जनाद्रिभं ४ प्रहस्त पृच्छैनमसौ किमागतः किमत्र कार्यं कुत एव वानरः वनं किमर्थं सकलं विनाशि
तं हताः किमर्थं मम राक्षसा बलात् ५ ततः प्रहस्तो हनुमंतमादरात् पप्रच्छ केन प्रहितोसि वानर
भयं च ते मास्तु विमोक्ष्यसे मया सत्यं वदस्वाखिलराजसन्निधौ ६

१ दर्शनादिरूपस्य गौरवात् वृद्धद्वयया
विसर्थः २ सभांतरस्य सभामध्यस्य सतं हनूमंतं बलारिजित् इंद्रजित ब्रह्मवरेण ब्रह्मवरलब्धब्रह्मास्त्रेण समाग
तर्बंधपीडामसहित्वा स्वयमेवागत इत्यर्थः तदुक्तोत्तरमाह अनेनेत्यादिः ३ एष हरिर्न लौकिकं इति तस्य रावणस्य कथ

नं अंजनाद्रिभं अंजनाचलवच्छ्यामकांतिं ४ कुतः कस्माद्देशादागत इति शेषः विमोक्ष्यसे अस्माद्बंधनात् प्राणभयाच्चेति शेषः अखिलराजसन्निधौ अखिललोकराजस्य रावणस्य सन्निधावित्यर्थः ६ ७ देवगणादीनामपि त्रपात्रो आदिनानागादिसंग्रहः अशेषहृत्स्थितेः अशेषहृदयेषु स्थितिर्यस्य सर्वांतर्यामिण इत्यर्थः अनेन तव ततः कथमपि मो

ततोतिहर्षात्पवनात्मजो रिपुं निरीक्ष्य लोकत्रयकंटकासुरं वक्तुं प्रचक्रे रघुनाथसत्कथां क्रमेण राम मनसा स्मरन्मुहुः ७ शृणु स्फुटं देवगणाद्यमित्र हे रामस्य दूतोहमशेषहृत्स्थितेः यस्याखिलेशस्य हृताधुना त्वया भार्या स्वनाशाय शुनेव सद्धविः ८ स राघवोभ्येत्य मतंगपर्वतं सुग्रीवमैत्रीमनलस्य सन्निधौ कृत्वैकबाणेन निहत्य वालिनं सुग्रीवमेवाधिपतिं चकार तं ९ स वानराणामधिपो महाबली महाबलैर्वानरयूथकोटिभिः रामेण सार्धं सहलक्ष्मणेन भो प्रवर्षणेऽमर्षयुतो वतिष्ठते १० संचोदितास्तेन महाहरीश्वरा धरासुतां मार्गयितुं दिशो दश तत्राहमेकः पवनात्मजः कपिः सीतां विचिन्वन्शनकैः समागतः ११

१० अस्य इति सूचितं किं च त्वन्मृत्युं चिकीर्षोस्तस्यैव प्रेरणया सीता हृतेति सूचितं ८ स राघवः सुग्रीवमैत्रीं कृत्वा वालिनं निहत्य तं प्रसिद्धपराक्रमं सुग्रीवमेव वानराणामधिपतिं चकार अनेन रामस्य कृतपकारत्वात् तन्निमित्तं सुग्रीवः सर्ववानरैः र्वं कार्यकारी तस्य स्येवेति सूचितं मित्रमर्थयुतः स्त्वद्विध भार्याहारिणां च तोप्यधिकं वलं वालिनं यो हतवान् स त्वां सर्वथा हनिष्यत्येवेति सूचितं ९ मोऽइतिरावण संबोधनं प्रवर्षणे तदाख्ये प

वेति समर्थयुतः स्वस्मिन्नस्य कोऽयं युक्तो वालि ष्टे १०
धरासुतां जानकीं कैन कियं तां गत इत्यर्थः कि

राम
१५

वननाशकारणमाह कपित्वादिति चंचलस्वभावत्वादित्यर्थः राक्षसहननहेतुमाह दृष्टेति १२ वपुः स्वशरीरं परिरक्षितं तत्रहेतुः प्रियोहीति १३ त्वत्त्वागतं ब्रह्मास्त्रमिति शेषः बद्धइवागतः तयागमनहेतुर्हितंप्रवक्तुकाम इति तव तत्सवचने किन्निमित्तं आह करुणेति १४ विवेकृतः विवेकेन सह सद्विवेकेन लोकस्य गति धर्मात्स्वर्गो ऽधर्मान्नरक इत्येवंरूपां विचार्य राक्षसीतामसीं बुद्धिं त्यजेत्यर्थः संसृतेः संसाराद्यो मोक्षस्तस्य हेतुकी हेतु

दृष्टा मया पद्मपलाशलोचना सीता कपित्वाद्विपिनं विनाशितं दृष्ट्वा ततोहं रभसा समागतान् मां हंतुकामान् धृतचापसायकान् १२ मया हतास्ते परिरक्षितं वपुः प्रियोहि देहोखिलदेहिनां प्रभो ब्रह्मास्त्रपाशेन नलीबध्य मां ततः समागमन्मेघनिनादनामकः १३ स्पृष्ट्वैवमां ब्रह्मवरप्रभावतस्त्वत्त्वागतं सर्वमवैपि रावण तथाप्यहं बद्धइवागतो हितं प्रवक्तुकामः करुणारसार्द्रधीः १४ विचार्य लोकस्य विवेकतो गतिं न राक्षसीं बुद्धिमुपेहि रावण दैवीं गतिं संसृतिमोक्षहेतुकीं समाश्रयात्यंतहिताय देहिनः १५ त्वं ब्राह्मणो ह्युत्तमवंशसंभवः पौलस्त्यपुत्रोसि कुबेरबांधवः॥

भूतां विनयादित्वादिवक्रूरदर्शी दैवीं देवप्रोक्तां गतिमार्गं परपीडातो निवृत्तिरूपं मार्गं समाश्रय देहिनस्त्वस्यात्यंतहितायेत्यर्थः १५ ननु तस्मिन्मार्गे ममानाधिकार इति चेन्न ब्राह्मणत्वादिना तत्सत्वमित्याह त्वमिति उत्तमवंश संभवत्वस्य विवरणं पौलस्त्यपुत्रोसीति यदि ते देह एवात्मेति बुद्धिस्तथापि पश्य विचारय त्वं राक्ष

ए०अ०मुं० स सोनासि उत्तमवंशसंभवेन ब्राह्मणत्वादितिभावः आत्मबुध्या देहातिरिक्त आत्मेति बुध्या राक्षसो न हि भवसीति कि
१६ मुवक्तव्यमितिशेषः १६ एवं सर्वथा राक्षसत्वाभावं प्रसाध्याह शरीरेति शरीरं स्थूलं बुद्धिः सूक्ष्मशरीरं इंद्रिया
णीचक्षुरादीनि तज्जन्य दुःखसंगति एघिता दुःखेषु पलक्षणं कामादेरपि संततिः तेतव तत्तेषां चित्तधर्मत्वा
त् त्वं च तदाश्रयश्चित्तं नेति शेषः पूरणेन व्याख्येयं तस्याचेतनत्वादितिभावः नन्वात्मन एव दुःखादिमत्वे च
विकारप्रसंग एव च चात्मनो विक्रियत्वप्रतिपादकश्रुतिविरोधस्ता श्रुतयः पूर्वं बहुशो लिखिताः नन्वेवं म
हं दुःखीत्यादिप्रतीतेः का गतिस्तत्राह अज्ञानहेतोरिति स्वपतः पुरुषस्य प्रतिभासमानस्यापि दृश्यस्य

देहात्मबु ध्यापि च परराक्षसो नास्यात्मबुध्या किमु राक्षसो न हि १६ शरीरबुद्धीन्द्रियदुः
खसंततिर्न ते न च त्वं तव निर्विकारतः अज्ञानहेतोश्च तथैव संततेरसत्वमस्याः स्वपतो हि
दृश्यवत् १७ इदं तु सत्यं तव नास्ति विक्रिया विकारहेतुर्न च तेऽद्वयत्वतः ॥ यथा नभः सर्वगतं
न लिप्यते तथा भवान्देहगतोऽपि सूक्ष्मकः १८

॥ स्वान्यपदार्थस्य यथाऽसत्वं तथा आत्मस्वरूपाज्ञान रा०म०
रूपाद्धेतोर्भासमानाया अस्याः संततेर्दुःखं सते वस्तुतोऽसत्वमेवैवं चाहं दुःखीत्यादिप्रतीतिः स्वप्नकालि १६
कतत्प्रतीतिस्वप्नकालिकतत्प्रतीतिवन्द्रमप्रवेतिभावः १७ नन्वेवं च सत्यं वस्तु किमपि नास्त्येव किं अ
स्तीत्याह इदं तु सत्यमिति तिक्तस्वरूपं चित्यर्थः एतत्तव विक्रिया नास्ति अविकारी चेतन एवैकः सत्यः

ननुविकारहेतुज्ञानमपि सत्यमेवनेत्याह तेविकारहेतुर्नचसत्यइतिशेषः तत्र हेतुमाह अद्वयत्वःएक
एवाद्वितीयंब्रह्मेत्यद्वैतप्रतिपादकश्रुतिविरोधात् त्वयाहि सतोद्वितीयस्यनिषेधइतिभावः ननुचित्त
संबंधान्ममदुःखाऽस्त्येवेतिचेन्नेत्याह यथासर्वगतमपिनभः पृथिव्यादिरूपगंधादिभिर्नोपलिप्यते
सूक्ष्मत्वात्तथादेहगतोपि चित्तसमानाधिकरणोपि यतः सूक्ष्मकोतिसूक्ष्मोतस्तत्कृतदुःखादिभिर्वस्तुतो
नलिप्यते एवंचनीलनभइत्यादिप्रतीतिवदहंदुःखीत्यादिप्रातीतिर्भ्रम एवेतिभावः ननुतर्हि मुक्तसंसा

देहेंद्रियप्राणशरीरसंगतस्त्वात्मेतिबुध्याऽखिलबंधभाग्भवेत् १८ चिन्मात्रमेवाहमजोहमक्ष
रोह्यानंदभावोहमितिप्रमुच्यते देहोप्यनात्मा पृथिवीविकारजोनप्राणआत्मानिलएषएव
वसः १९ मनोप्यहंकारविकारएवनोनचापिबुद्धिः प्रकृतेर्विकारजा आत्माचिदानंदमयो
ऽविकारवान् देहादिसंघाद्व्यतिरिक्तईश्वरः २०

॥रिव्यवस्थां किंनास्त्येवास्तीत्याह देहेत्यादि देहोत्रसू
क्ष्मशरीरंस्थूलंतत्संगतस्तद्विवेकाग्रहात् तेष्वेव यात्मबुद्धिस्तयाऽखिलबंधभाग्भवेत् अविवेकएव
मुख्यंसंसारकारणमितिभावः १८ ननुतर्हि मुक्तिदुर्लभेतिशंकायांतत्कारण[illegible]मात्रमिति वि
वेकज्ञानएव मोक्षकारणमितितमाह तत्राद्यार्धेनात्मनिजडवैधर्म्यमुक्तं अजत्वे[illegible]हित्यं अक्ष
रत्वेनाविनाशित्वं आनंदभावः तद्रूपः देहादौतद्वैधर्म्यमुक्तंप्राणोप्यात्मानयतएवोवदिदृश्यमानौ॥

रा०अ०सुं० जडोनिल एवास्य प्राणः अप्राणः स वायुरिति श्रुतेः १९ मनोपि नात्मेत्याह मनोपीति नो इत्य आत्मेति शेषः नात
१७ स्ततः अहंकारस्य विकारः नचापि बुद्धिरिति बुद्धिरहंकारोपि नात्मा यतः साप्रकृतेर्विकारः हेतौ जसा जायत
इति प्रकृतेर्विकारजा आत्मनि उक्तमेव नैधर्म्यं दार्ढ्याय पुनराह आत्मेत्यादि स एवेश्वरः अनेन चेतनावे
त्वे चेति दर्शितः २० निरंजन इत्यस्यैव व्याख्या सदा उपाधितो मुक्तः उपाधिभूतचित्तधर्मैर्दुःखादिभि
रलिप्त इत्यर्थः अत एवात्मा संसाराद्विमुच्यते नचेदृशज्ञानमेव कथं स्यात्तत्राहातो हमिति मोक्षस्यात्पतिकं

निरंजनो मुक्त उपाधितः सदा ज्ञात्वैवमात्मानमितो विमुच्यते अतोहमात्यंतिकमोक्षसाध
नं वक्ष्ये श्रृणुष्वावहितो महामते विष्णोर्हि भक्तिः सुविशोधनं धियः स्ततो भवेज्ज्ञानमतीव नि
र्मलं विशुद्धतत्वानुभवो भवेत्ततः सम्यक् विदित्वा परमं पदं व्रजेत् २२ अतो भज त्वाद्य हरिं र =
मापतिं रामं पुराणं प्रकृतेः परं विभुं विसृज्य मौर्ख्यं हृदि शत्रुभावनां भज त्वरामं शरणागतप्रि=य

साध्वनियतं साधनमित्यर्थः २१ प्रतिज्ञातमाह विष्णोर्हीति धियश्चित्तस्य नित्यानित्यविवेकद्वारा ज्ञानं
आत्मा चिदानंदमय इत्यादिनोक्तं ततः तद्विषयनिदिध्यासनतः विशुद्धतत्वानुभवो भवेत् अपरोक्षा सा राम०
क्षात्कारो भवेत् तं परमं पदं ब्रह्मसायुज्यं २२ उपसंहरति अत इति यस्य भक्तिर्ज्ञानसाधनं स विष्णुरयमे १७
व तद्बोधके विशेषणे हरिं रमापतिमिति मनुदशरथपुत्रो यं नरस्तत्राह प्रकृतेः परमित्यादि दशरथपु

न्त्वादितु कल्पितमित्याशयः मौख्यं अयमनुष्य इति बुद्धिरूपं तत्कृता शत्रुत्वेन भावनां च विसृज्य भज सत्यं प्र
तियुक्तं भजनप्रकारमाह सीतामिति २३ अथ व्यतिरेकमुखेन तद्भावनाप्रकारमाह रामम् इति हृदिस्थमित्य
नेनांतर्यामित्वोतयामेरकत्वमुक्तं सुखरूपो ऽद्वितीयो मत्सोरकइत्येवमभावयन्निति यावत् दुःखरूपास्तरं

सीतां पुरस्कृत्य सपुत्रबांधवो रामं नमस्कृत्य विमुच्यसे भयात् २३ रामं परात्मानमभावयन् जनो
भक्त्या हृदिस्थं सुखरूपमद्वयं कथं परं तीरमवाप्नुयाज्जनो भवांबुधेर्दुःखतरंगमालिनः
२४ नो चेत्वमज्ञानमयेन वह्निना ज्वलंतमात्मानमरक्षितारिवत् नयस्यधोधः स्वकृतैश्च पा
तकैर्विमोक्षशंका न च ते भविष्यति २५ श्रुत्वामृतास्वादसमानभाषितं तत्त्वा सुसूनोर्दशकं
धरो सुरः अमृष्यमाणोतिरुषा कपीश्वरं जगाद रक्तांतविलोचनो ज्वलन् २६ कथं ममाग्रे विल
पस्यभीतवत् प्लवंगमानामधमोसि दुष्टधीः क एष रामः कतमो वनेचरो निहन्मि सुग्रीवयुतं न
राधमं २७ त्वां चाद्य हत्वा जनकात्मजां ततो निहन्मि रामं सहलक्ष्मणं ततः सुग्रीवमग्रे बलिनं क
पीश्वरं सवानरं हन्म्यचिरेण वानर २८ ॥

॥ तरंगमाला यस्य तस्य २४ नो चेत पातकैर्मदुक्ताकरणे तेन
ज्वलंतमात्मानमरक्षिताल्लुटिरूपं किंच स्वकृतैः पातकैः सीताहरणादिभिः सर्पः रिपुवत् आत्मानमधोधो
नयसि मयि ष्यसीत्यर्थः आर्षत्वविमोक्षशंका तत्संभावनापि न भविष्यतीत्यर्थः २५ अमृतास्वादेति तदा

स्वादेन समान आस्वादो यस्य तादृशं भाषितमित्यर्थः २६ वनेचरः सुग्रीवः केषांमध्येऽतिशयितो न केयामपीत्यर्थः
२७ विवृद्धकोपेन विवृद्धेन कायेन करणेनेत्यर्थः असुरं दह निवाहेति शेषः २८ अधमे सत्र क्रोधातिशये
न दूरात्संबोधने ई वस्तुतः २९ पार्श्वे स्थितं राक्षसमित्यर्थः त्वं पः खंडशः कुर्वीति शेषः असुरस्य ममामित्राणि
बांधवाश्च पश्यंतु ३० हे राजन् अयं परराज्यस्योत्कृष्ट राज्यशत्रुराज्यवा वानरो वधयोग्यो न भवेत् प्रता

श्रुत्वा दशग्रीववचः समारुति विवृद्धकोपेन दहन्निवासुरं ॥ नमेसमा रावणको ट्योधमारा
मस्मदासो हमपारविक्रमः श्रुत्वाति कोपेन हनूमतो वचो दशाननो राक्षसमेकमब्रवीत् २९
पार्श्वे स्थितं मारय खंडशः कपिं पश्यंतु सर्वे सुरमित्रबांधवाः निवारयामास ततो विभीषणो
महासुरं सायुधमुद्यतं वधे ३० राजन्वधार्हो न भवेत्कथंचन प्रतापयुक्तैः परराजवानरः
हतेस्मिन्वानरे दूते वार्त्तां को वा निवेदयेत् रामाय त्वं यमुद्दिश्य वधायसमुपस्थितः ३१
अतो वधसमं किंचिदन्यच्चिंतय वानरे स चिन्हो गच्छतु हरिर्यं दृष्ट्वा यास्यति द्रुतं ३२

पयुक्तै राजनिर्वधयोग्यता संभावनमप्यनुचितं दूतत्वात् किं पुनर्वध इति भावः अयं प्रताप
युक्तैराजनिर्वधयोग्यता संभावनमप्यनुचितं दूतत्वात् किं पुनर्वध इति भावः अयं प्रतापयुक्तै
रिंद्रजिदादिभिरपि वधयोग्यो नेति दृष्यात्रयासइति व्यंग्यं वधे वाधकांतरमप्याह ते इति वार्त्तासि
तो वार्त्तां निवेदयेत् रामाये त्यन्वयः रामस्य त्वं वधाय समुपस्थितः यं राममुद्दिश्य त्वमात्मवधाय स

३१ आयास्यतीतिच्छेदः ३२

मुपस्थितः आत्मवधार्थं तदागमने त्वावा
न् स एतद्वधे कथमन्नागच्छेदिति गूढार्थः

ततोयुद्धं त्वदभिलषितं ३३ महामानः प्रीतिपूर्वकोममेदमस्तु पादेयमित्याभिमानः ३४ सर्वेवानरयूथपाः पश्यं
तु दग्धपुच्छमेनमिति शेषः ३५ ३८ किंचित् नगरदाहं ३९ सूक्ष्मोभूत्वा बंधान्निस्सृतः ततः पुनरपि पर्वताका

॥३३॥
रामः सुग्रीवसहितस्ततो युद्धं भवेत्तव बिभीषणवचः श्रुत्वा रावणोप्येतदब्रवीत् वानराणां
हि लांगूले महामानो भवेत्किल अतोवस्त्रादिभिः पुच्छं वेष्टयित्वा प्रयत्नतः ३४ वह्निनायो
जयित्वैनं भ्रामयित्वा पुरे भितः विसर्जयत पश्यंतु सर्वेवानरयूथपाः ३५ तथेति शणपट्टै
श्च वस्त्रैरन्यैरनेकशः तैलाक्तैर्वेष्टयामासु र्लांगूलं मारुतेर्दृढं ३६ पुच्छाग्रे किंचिदनलं दी
पयित्वाथ राक्षसाः रज्जुभिः सुदृढं बध्वा धृत्वा तं बलिनो सुराः ३७ समंताद्भ्रामयामासुश्चौ
रोयमिति वादिनः तूर्यघोषैर्घोषयंतस्ताडयंतो मुहुर्मुहुः ३८ हनूमतापि तत्सर्वं सोढं किंचि
च्चिकीर्षुणा गत्वा तु पश्चिमद्वारसमीपं तत्र मारुतिः ३९ सूक्ष्मो बभूव बंधेभ्यो निःसृतः पु
नरप्यसौ बभूव पर्वताकारस्तत उत्प्लुत्य गोपुरं ४० तत्रैकं स्तंभमादाय हत्वा तान्रक्षिणः
क्षणात् विचार्य कार्यशेषं स प्रासादाग्रागृहाद्गृहं ४१ उत्प्लुत्योत्प्लुत्य संदीप्तपुच्छेन महता
कपिः ददाह लंकामखिलां साट्टप्रासादतोरणां ४२
॥ऐ बभूव ततो गोपुरं पुरद्वारमुत्प्लुत्य तत्र वि
घमानमेकस्तंभं ४० कार्यशेषं लंकादाहरूपं ४१।४२ ॥ ०॥

हा ताते त्यादि क्रंदमानाः प्रासादशिखरे आरूढा अपि व्याप्ता वह्निनेति शेषः ४३ वह्नौ यतं स्यो देता इव दृश्यंते
४४ जलधौ ततसमीपे उत्पपातः समुद्रमध्ये लांगूलें मज्जयित्वा स्वस्य चितो बभूव ४५ वायोः प्रियमित्रत्वा
त सीता प्रार्थनेन च अनलो निर्वीर्यो सुपुत्रस्य हरेः पुच्छं न ददाह तावन्मात्रमेव न किंतु त्यतंसी तलश्च बभूव ४६

हा तात पुत्र नाथे ति क्रंदमानाः समंततः व्याप्ताः प्रासादशिखरेप्यारूढा दैत्ययोषितः ४३ दे
वता इव दृश्यंते पतंत्यः पावके खिलाः बिभीषणगृहं त्यक्त्वा सर्वं भस्मीकृतं पुरं ४४ तत उत्प्लु
त्य जलधौ हनूमान्मारुतात्मजः लांगूलं मज्जयित्वातः स्वस्थचित्तो बभूव सः ४५ वायोः प्रि
यसखित्वाच्च सीतया प्रार्थितो नलः न ददाह हरेः पुच्छं बभूवास्य तशीतलः ४६ यन्नाम संस्मर
णाधूतसमस्तपापास्तापत्रयानलमपीह तरंति सद्यः तस्यैव किं रघुवरस्य विशिष्टदूतः संतप्य
ते कथमसौ प्रकृतानलेन ४७ इति श्रीमदध्यात्मरामायणे उ० सुंदरकांडे चतुर्थः सर्गः ४ ततः
सीतां नमस्कृत्य हनूमानब्रवीद्वचः आज्ञापय तु मां देवि भवती रामसन्निधिं १ श्रीमहादेव उवाच ॥

॥ धूतानि दूरीकृतानि

समस्तपापानि ये स्ते तापत्रय दहता वन्मात्रमेव न किंतु त्यतंसी तलश्च बभूव ये य माध्यात्मिकाधिभौतिकाधिदैव भे
दात् तज्जन्यं वह्निमपि तरंति ते मनयी ह्यंते इत्यर्थः ४७ इति श्रीमदध्यात्मरा० सुंदरकांडे चतुर्थः सर्गः ४ अथ लं
का दाहे शोकपवनस्यारोह पि सा दाहसंदेह निर्दृत्ये ये पुनः सीतां दृष्टा तामापृच्छ्य आगत इत्या हतत इति देहेहे ति राम

संनिधिं गच्छ भगवती मामाहाय पवित्रस्व
नयः ८

सानुजो रामस्त्वां द्रष्टुमामती सुक्त्वा जानकीं त्रिः परिक्रम्य प्रदक्षिणं कृत्वा २ पुनः प्रणम्य गंतुं प्रस्थित इदं वक्ष्यमाणं
अब्रवीत् ते भद्रमिति विनिघोक्तिः ३ ४ वार्त्ताश्रुति वार्त्ताश्रवणं ५ यद्येव राजवार्त्ताश्रवणं विना स्थातुमशक्य
ते यदि मन्त्र सपद्येचत्ततावचिते आज्ञारेति शेषः ६ प्राणीष्येति सुख्यः पक्षरया तदकरणेव ध्वाचेति शर पंजरैः

गच्छामि रामस्त्वां द्रष्टुमागमिष्यति सानुजः इत्युक्त्वा त्रिः परिक्रम्य जानकीं मारुतात्मजः २ प्रण
म्य प्रस्थितो गंतुं इदं वचनमब्रवीत् देवि गच्छामि भद्रं ते तूर्णं द्रक्ष्यसि राघवं ३ लक्ष्मणं च ससु
ग्रीवं वानरायुतकोटिभिः ततः प्राह हनूमंतं जानकी दुःखकर्षिता ४ त्वां दृष्ट्वा विस्मृतं दुःखं
इदानीं त्वं गमिष्यसि इतः परं कथं वर्त्ते रामवार्त्ताश्रुतिं विना ५ मारुतिरुवाच यद्येवं देवि मे स्कं
धमारोह क्षणमात्रतः रामेण योजयिष्यामि मन्यसे यदि जानकि ६ सीतोवाच रामः सागर
माशोष्य बध्वा वा शरपंजरैः आगत्य वानरैः सार्धं हत्वा रावणमाहवे ७ मां नयेद्यदि रामस्य
कीर्त्तिर्भवति शाश्वती अतो गच्छ कथं चापि प्राणान्संधारयाम्यहं ८ इति प्रस्थापितो वीरः
सीतया प्रणिपत्य तां जगाम पर्वतस्याग्रे गंतुं पारं महोदधेः ९

७ शरसमूहैः ७ यदि नयेत्तर्हि रा
मस्य शाश्वती कीर्त्तिर्भवेत् कथं चापि कथंचिदित्यर्थः ८ महोदधेः परं पारं गंतुं पर्वतस्याग्रे उपरिभागे जगा
म ९ ॥ ० ॥०॥ ०॥०॥० ॥० ॥०॥०॥० ॥०॥०॥ ०॥ ०॥ ०॥ ०॥ ०॥ ०॥ ०॥ ०॥०॥०॥

रा०अ०सुं० महासत्त्वो महाबलस्तत्रोर्ध्वशिखरे गत्वा पर्वतश्च महीतलं जगाम त्वनुकर्षः १० तद्गमनमध्यं श्रोनन किंतु संपू
२० र्ण एव जगत इत्याहं त्रिंशद्योजनं महीतलं उच्छ्रितोपि महीसमानत्वं जगाम वागनंतस्थः गगनमध्यस्थः ११ तं म
हांतं शब्दं महान्स्वनः प्रति ध्वनिर्यस्य तं शब्दं चक्रुः १२ हनूमानेवायं कृतं कार्यः समागत इति शब्देनैव जानीमः

तत्र गत्वा महासत्वः पादाभ्यां पीडयन् गिरिं जगाम वायुवेगेन पर्वतश्च महीतलं १० ततो मही
समानत्वं त्रिंशद्योजनमुच्छ्रितः मारुतिर्गगनांतस्थो महाशब्दं चकार सः ११ तं श्रुत्वा वानराः स
र्वे ज्ञात्वा मारुतिमागतं हर्षेण महता विष्टाः शब्दं चक्रुर्महास्वनं १२ शब्देनैव विजानीमः कृत
कार्यः समागतः हनूमानेव पश्यध्वं वानरा वानरर्षभं १३ एवं ब्रुवत्सु वीरेषु वानरेषु समारु
तिः अवतीर्य गिरेर्मूर्ध्नि वानरानिदमब्रवीत् १४ दृष्टा सीता मया लंका धर्षिता सकानना सं ८५
भाषितो दशग्रीवस्ततोहं पुनरागतः १५ इदानीमेव गच्छामो रामसुग्रीवसंनिधिं इत्युक्त्वा
वानरास्सर्वे हर्षेणालिंग्य मारुतिं १६ केचिच्चु चुंबुर्लांगूलं ननृतुः केचिदुत्सुकाः हनूम
तासमेतास्ते जग्मुः प्रस्रवणं गिरिं १७ गच्छंतो ददृशुर्वीरा वनं सुग्रीवरक्षितं मधुसंज्ञं तदा
प्राहुरंगदवानरर्षभाः १८ रा०म०
॥ केचिद्वानरा दृष्ट्वा वानरर्षभ पश्यध्वमित्याहुः १३ १४ पूर्वं सीतायदो २०
क्तेः पादांतोच्चारणपर्यंत क्रियापदसंदेहस्यादिति पूर्वं दृष्टेत्युक्तिः १५ केचिच्चुचुंबुरित्यादि हर्षाविष्टवा
नराजातिलक्षण १७ १८

१९ संतुष्टाः फलभक्षणे मधुपानेन च जक्षध्वं भक्ष्यं विसर्प्यः २० २१ दधिवक्त्रो नाम तद्रक्षिणमुख्यस्तद्रक्षिण
धिकृतः २२ वानरर्षभाः दधिवक्त्रप्रेरिताः पिबतो वानरांस्ताडयामासुरीत्यन्वयः २३ २४ कुमारेणांगदेन हनु

क्षुधिताःस्मो वयं वीर देह्यनुज्ञां महामते भक्षयामः फलान्यद्य पिबामोऽमृतवन्मधु १९ संतु
ष्टा राघवं द्रष्टुं गच्छामोऽद्यैव सानुजं २० अंगदस्त्वुवाच हनुमान्कृतकार्यो यं पिबंतेत त्प्रसाद
तः जक्षध्वं फलमूलानि त्वरितं हरिसत्तमाः २१ ततः प्रविश्य हरयः पातुमारेभिरे मधु
रक्षिणस्ताननादृत्य दधिवक्त्रेण नोदितान् २२ पिबतस्ताडयामासुर्वानरान्वानरर्षभाः त
तस्तान्मुष्टिभिः पादैः श्चूर्णयित्वा पपुर्मधु २३ ततो दधिमुखः क्रुद्धः सुग्रीवस्य स मातु
लः जगाम रक्षिभिः सार्धं यत्र राजा कपीश्वरः २४ गत्वा तमब्रवीद्देव चिरकालाभिरक्षितं
नष्टं मधुवनं तेऽद्य कुमारेण हनूमता २५ श्रुत्वा दधिमुखेनोक्तं सुग्रीवो हृष्टमानसः दृष्ट्वा
गतो न संदेहः सीतां पवननंदनः २६ नो चेन्मधुवनं द्रष्टुं समर्थः को भवेन्मम तत्रापि वायुपु
त्रेण हतकार्येण संशयः २७ श्रुत्वा सुग्रीववचनं हृष्टो रामस्तमब्रवीत् किमुच्यते त्वया
राजन्वचः सीताकथान्वितं २८

१८ मता च नष्टं नाशितमित्यर्थः २५ दृष्ट्वा आगत इति छेदः २६ नो चेन्म
म मधुवनं द्रष्टुं कः समर्थो भवेत् २७ अतिहर्षाद्धनुमानेन सुग्रीवं प्रति राजनीति वचः २८ एम ॥७॥

अवनीसुताजानकी २९ ममम धुवनं द्रष्टुं न समर्था इत्यन्वयः ३० भो रक्षिणो वो युष्माकं वानरेभ्य स्ताउ
नतं भयं मास्तु अतो ममाज्ञया गतांगदमुखात् वानरान् ब्रूत युष्मान् रामसुग्रीवावाकारयत् इति शेषः इत्यु

सुग्रीवस्त्वब्रवीद्वाक्यं देव दृष्टावनीसुता हनूमत्प्रमुखाः सर्वे प्रविष्टा मधुकाननं २९ भक्षयं
तिस्म सकलं ताडयंतिस्म रक्षिणः अकृत्वा देवकार्यं ते द्रष्टुं मधुवनं मम ३० न समर्थास्ततो दे
वी दृष्टा सीतेति निश्चितं रक्षिणो वो भयं मास्तु गत्वा ब्रूते ममाज्ञया ३१ वानरानंगदमुखानान ग ३
यध्वं ममांतिकं श्रुत्वा सुग्रीववचनं गत्वा ते वायुवेगतः ३२ हनूमत्प्रमुखान् ऊचुर्गच्छतेश्वरशा
सनात् द्रष्टुमिच्छति सुग्रीवः सरामो लक्ष्मणान्वित ३३ युष्मानतीव हृष्टास्ते त्वरयंति महा
बलाः तथेत्यंबरमासाद्य ययुस्ते वानरोत्तमाः ३४ हनूमंतं पुरस्कृत्य युवराजं तथांगदं राम
सुग्रीवयोरग्रे निपेतुर्भुवि सत्वरं ३५ हनूमान् राघवं प्राह दृष्टा सीता निरामया साष्टांगं प्रणि
पत्याग्रे रामं पश्चाद्धरीश्वरं ३६ कुशलं प्राह राजेंद्र जानकी त्वां शुचान्विता अशोकवनि
कामध्ये शिंशपामूलमाश्रिता ३७

आनयध्वं ममांतिकं मत्समीपं आनयध्वं ३१ ३२ ३३ अतीव हृष्टा राम० २१
स्ते रामसुग्रीवलक्ष्मणाः युष्मान् स्वसमीपगमनाय त्वरयंति ३४ ३५ भूसंबंधोत्तरं राघवाश्वासनाय पू
र्वं दृष्टा सीतेत्याह ततः क्रमेण रामसुग्रीवौ प्रणिपत्य ३६ जानकीकुशलं प्राहेत्याह शुचा शोकेन ३७

हा इति शोकव्यंजकमत्र ३८ जन्मारभ्य तव कथा ब्रुवता मया सूक्ष्मरूपेण वृक्षशाखांतरे स्थित्वा शनैराश्वा
सितेत्यन्वयः ३९ आत्मचर्यं विस्तरेण दंडकागमनादिकयोक्तेति शेषः त्वयि रहिते देशांतरे सति जानक्या दृशा

एम

राक्षसीभिः परिवृता निराहारा कृशा प्रभो हा राम मे रामेति शोचंती मलिनांबरा ३८ एकवेणी
मया दृष्टा शनैराश्वासिता शुभा वृक्षशाखांतरे स्थित्वा सूक्ष्मरूपेण ते कथां ३९ जन्मारभ्य त
वात्मचर्यं दंडकागमनं तथा दशाननेन हरणं जानक्या रहिते त्वयि ४० सुग्रीवेण यथा मैत्री
कृत्वा वालिनिबर्हणं मार्गणार्थं च वैदेह्याः सुग्रीवेण विसर्जिताः ४१ महाबला महासत्वा ह
रयो जितकाशिनः गताः सर्वत्र सर्वे वै तत्रैकोहमिहागतः ४२ अहं सुग्रीवसचिवो हासो
हं राघवस्य हि दृष्टा यज्जानकी भाग्यात्त्वयासः फलितो घमे ४३ इत्युदीरितमाकर्ण्य सीता
विस्फारितेक्षणा के न वा कर्णपीयूषं श्रावितं मे शुभास्वरं ४४ यदि सत्यं तदा यातु मद्दृशी
न पश्यं तु सः ततोहं वानरश्रेष्ठः सूक्ष्मरूपेण जानकी ४५ प्रणम्य प्रांजलिर्भूत्वा दूरादेव स्थि
तः प्रभो पृष्टोहं सीतया कस्त्वमित्यादि बहुविस्तरं ४६ मया सर्वं क्रमेणैव विज्ञापितमरिंद
म पश्चान्मयार्पितं देव्यै भवद्दत्तांगुलीयकं ४७

॥ननेन हरणमित्यन्वयः ४० वालिनिबर्हणं त
द्वधं कृत्वा यथा सुग्रीवेण मैत्री सफला कृतेति शेषः ४१ ४२ ४३ ४४ सः येनोक्तं स इत्यर्थः ४४

३४

रा०अ०सुं०

२२

तेन अंगुलीयकळामनराघवस्यास्त्रासः सेवक इति विश्वस्तारा क्षसीनां तर्जनैः पीड्यमाना यथा दृष्टा
स्मितं त्सर्वं पीडनं राघवे कथय ४८ त्वच्चित्तापरिनिष्टितः त्वच्चिंतायां स्थितः ४९ त्वद्वार्त्तानधिगम्य
अहोरात्रं परं शोचति त्वामिति शेषः ५० ५१ विश्वसेत् स त्वं जानकीं दृष्ट्वा आगत इति विश्वसेदित्यर्थः

तेनमामतिविश्वस्ता वचनं चेदमब्रवीत् यथा दृष्टासि हनुमन् पीड्यमाना दिवानिशं ४८
राक्षसीनां तर्जनैस्तत्सर्वं कथय राघवे मयोक्तं देवि रामोपि त्वच्चिंतापरिनिष्ठितः ४९
परिशोचत्यहोरात्रं त्वद्वार्त्तानाधिगम्य सः इदानीमेव गत्वाहं स्थितिं रामाय ते ब्रुवे ५० रा
मः श्रवणमात्रेण सुग्रीवेण सलक्ष्मणः वानरानीकपैः सार्धमागमिष्यति तेंतिकं ५१
रावणं सकुलं हत्वा नेष्यति त्वां स्वकं पुरं अभिज्ञां देहि मे देवि यथा मां विश्वसेद्विभुः ५२
इत्युक्ता सा शिरोरत्नं चूडापाशे स्थितं प्रियं दत्वा काकेन यद्वृत्तं चित्रकूटगिरौ पुरा ५३ तद
प्याहाश्रुपूर्णाक्षी कुशलं ब्रूहि राघवं लक्ष्मणं ब्रूहि मे किंचिदुरुक्तं भाषितं पुरा ५४ तत्क्षम
स्वाज्ञभावेन भाषितं कुलनंदन तारयेन्मां यथा रामस्तथा कुरु कृपान्वितः ५५ इत्युक्त्वा रु
रुदती सीता दुःखेन महताहृता मया ह्याश्वासिता राम वदन्ता मेवं सर्वं ते ५६

५२ शिरोरत्नं
दत्वा चित्रकूटगिरिस्थं काकवृत्तमप्याह ५३ ततः संदेशमाहेति शेषः तमाहाश्रुपूर्णाक्षीति यन्मे किंचिदु
रुक्तं दुर्वचो भाषितं तत्क्षमस्व तदज्ञभावेनाज्ञतया मया भाषितं अतो यथा मां रामो स्माद्दुःखात्तारयेत्तथा कुरु ताः

बहुत्ता मया बिता आश्वासिता ५६

लिता: कुटुंबिनस्वभागवत्रिरमानयः ५४ ५५ म
हताः दुःखेन ह्रता म्या स्थिताः तेन केशिकेशीगतां

राम०

२२

प्रियां रावणस्येति शेषः ॥५७॥ उत्साद्य उत्सादितं दृष्ट्वा लंकां कृत्वा ॥५८॥ पुनरप्यागमं त्वत्समीपं इति शेषः प्रहृष्टधीः प्र
हृष्टचेतः ॥५९॥ मत्सुपकारिणं मां प्रति कृतोपकारस्य ॥६०॥ सर्वस्वं आलिंगनं ॥६१॥ सः जगत्कर्तृत्वादि परमैश्वर्य
र्यवान् ॥६२॥ आलिंगनस्य सर्वस्वत्वमुपपादयन्नाह परिरंभ इति गतस्त्वं मम भक्तोसि अतस्त्वया पलब्ध

ततः प्रस्थापितो राम त्वत्समीपमिहागतः ॥ तदागमनवेलायां अशोकवनिकां प्रियां ॥५७॥ उत्सा
द्य राक्षसांस्तत्र बहून् हत्वाक्षणं दह्व ॥ रावणस्य सुतं हत्वा रावणेनाभिभाष्य च ॥५८॥ लंका
मशेषतो दग्ध्वा पुनरप्यागमं क्षणात ॥ श्रुत्वा हनूमतो वाक्यं रामोत्यंत प्रहृष्टधीः ॥५९॥ हनूमं
स्ते कृतं कार्यं देवैरपि सुदुष्करं ॥ उपकारं न पश्यामि तव मत्सुपकारिणः ॥६०॥ इदानीं ते प्रयच्छा
मि सर्वस्वं मम मारुते ॥ इत्यालिंग्य समाकृष्य गाढं वानरपुंगवं ॥६१॥ सार्द्रनेत्रो रघुश्रेष्ठः परां
प्रीतिमवाप सः ॥ हनूमंतमुवाचेदं राघवो भक्तवत्सलः ॥६२॥ परिरंभो हि मे लोके दुर्लभः पर
मात्मनः ॥ अतस्त्वं मम भक्तोसि प्रियोसि हरिपुंगव ॥६३॥ यत्पादपद्मयुगलं तुलसीदलाद्यैः सं
पूज्य विष्णुपदवीमतुलां प्रयांति ॥ तेनैव किं पुनरसौ परिरब्धमूर्ती रामेण वायुतनयः कृतपु
ण्यपुंजः ॥६४॥ ॥ इति सुंदरकांडे पंचमः सर्गः ॥५॥ समाप्तः ॥
श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे

॥ इति शेषः ॥६३॥ कृतपुण्यपुंजो वायु
तनयः तेनैव रामेण परिरब्धमूर्तिरतुलां पदवीं प्रयातीति किं पुनर्वक्तव्यमिति शेषः ॥६४॥ इति श्रीमत्सकल
राजविपदुद्धरणसमर्थेत्यादि विरुदावलि हिम्मतिवर्म्मणः पुत्रस्य श्रीरामवर्म्मणः कृतावध्यात्मरामायणसुंद

अध्यात्मरामायणसुंदरकांडसमाप्तः

[OrderDescription]
,CREATED=18.02.20 12:53
,TRANSFERRED=2020/02/18 at 12:59:15
,PAGES=47
,TYPE=STD
,NAME=S0002852
,Book Name=M-2691-RAMAYAN SUNDAR KAND
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF

FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF

FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,